M - 2679

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
लंकागिरी माहात्म्य	शिवकाम पाठक	पुराण	पूर्ण	-	5/12	64	संस्कृत	कागद	13	46		

व्यंकटगिरि माहात्म्य ८ वराहपुराणांतरगतम

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुदत्तायेनमः श्रीमतेश्ववराहाय नमस्तस्मै वसुंधरा उद्धृतायेनपा
१ येन पातालाद्वासार्थं सर्वदेहिनां ॥ १ मुनयऊचुः भगवन्सूत सर्वज्ञ वेदव्यास कृपानिधे विष्णोः स्थानेषु सर्वेषु स्वयं १
व्यक्तस्थलेषु च २ यत्र विष्णोरतिप्रीतिर्यत्र सिध्यंति सिद्धयः अस्य मूलं च चारित्र्यं यत्र विष्णोः प्रवर्त्तते ३ मनु
ष्याणां च सततं यत्र सिद्धिर्भवेद्ध्रुवं श्रवणानंदजननं वृत्तांतं यस्य वा भवेत् ४ अस्माकं ब्रूहि पृच्छतां श्रोतव्यं नाव
शिष्यते इति पृष्टस्तदा सूतस्तपोध्यानसमाधिमान् ५ ध्यात्वा मुहूर्त्तमात्रं तु प्रोवाच मुनिसत्तमान् सूत उवाच
अहो पृष्टमपूर्वं च कौतुकं भवतामहो ६ ममापि वांछा महती वक्तुं तत्तु वदामि वः ॥ शृणुध्वं मुनयो यूयं सावधान
तया त्विदं ७ श्रीउरसेषु सत्त्वस्य हरेः श्रीजासमन्वितं विविधैस्तस्य चारित्रैरूपेतं सर्वसिद्धिदं ८ सर्वैश्वर्य
प्रदं नृणां सर्वाश्चर्यसमन्वितं पुण्यं पवित्रमायुष्यं सर्वमंगलकारकं ९ वराहकल्पे वृत्तांतं शेषाचलसमा
श्रयं पुरा हि सागरैः सर्वैरेकीभूते महार्णवे १० कल्पादौ भगवान्विष्णुर्वटपत्रसमाश्रयः महर्लोकं समाश्रि
त्य तिष्ठं तं जलसंप्लवं ११ विचिंत्य युगसाहस्रं जलावस्थानमद्भुतं यथापूर्वं जगत्स्रष्टुं मुमुक्षुः सर्वशक्तिमान्
१२ सर्वस्य धाताप्रवरो महात्मा सर्वात्मकः सर्वजगत्स्वरूपः सर्वेश्वरः सर्वविधानयत्नं चकार बुध्या करुणांबुजा
क्षः १३ इतीरितास्ते मुनयस्तदानीं सविस्मयोत्फुल्लहृदंबुजाक्षाः सूतं महांतं मुनिसंघसेवितं तमब्रुवन्वेदविदां वरि
ष्ठं १४ मुनय ऊचुः ॥ अज्ञानांगतज्ञानप्रकाशितहृदंबुज उद्योगानंतरं विष्णुः कृतवान्किं रमापतिः १५

कीदृशः प्रलयः कल्पः सर्गो वै कीदृशः पुनः एतावद्धा जलं कस्मादागतं वद सुव्रत १६ कुत्र वा धरणी याता गिर
यो वा महोन्नताः तत्सर्वं शंस भगवन् श्रोतुं कौतूहलं हि नः १७ इति पृष्टः पुनः प्राह तपोध्यानसमाधिमान् सूत उवाच ।
मुनयः श्रूयतां पूर्वं संग्रहेण तपोधनाः १८ चतुर्युगसहस्राणि प्रमाणं दिवसस्य च निशायास्तावदेवास्य निर्दिष्टः स
मयो विधेः १९ दिनावसानसमये ब्रह्मणो भगवान् रविः सहस्ररश्मिस्तपति त्रिमूर्त्याः स त्रिलोचनः २० वमस्यग्निं
महाघोरं धर्मदीधितिरंशुभिः कतिचिद्वत्सराण्येव वृष्टिर्नैव भवेत्तदा २१ भूर्लोकवासिनः सर्वे मुनयश्च तपोध
नाः वसेयुः सत्यलोकं हि पावकद्रुतनिशातदा २२ वनानि पर्वताश्चापि दग्धाः कालाग्निना तदा भस्मीभूताश्च व
स्वे वयायुः सर्वात्मको महान् २३ हायनाः कतिचिद्वाम्बुपश्चान्मेघा वलाहकाः स्थूलाकारास्सृजंत्येव तोय
धराः समंततः २४ सततं वत्सरानेवं कतिचित्तु निशामुखे द्रवीभूता मही हा भूमि पातालतलगामिनी २५ सा
गराः सप्त चान्योन्यं भवेयुः संगतास्तदा महर्लोकं समाश्रित्य तिष्ठत्येकोदकं तदा २६ तथैव युगसाहस्रं ब्रह्म
णः शर्वरी भवेत् निशावसाने गोविंदः सृष्टिस्थित्यंतकारकः २७ चतुर्मुखाच्छिवोशात्म्यं भूमेरुद्धरणं हरिः ।
कर्तुकामस्तदा विप्रा वटपत्रतले स्थितः श्वेतवाराहदेहं च सर्वयज्ञमयं शिवं अतिभीमं महारौद्रमासाद्य तर
सा तदा २९ प्रविश्य जलमध्ये तु क्षोभयामास वै तदा सवर्त्तमेघनिर्घोषं बृंहितं च मुहुर्मुहुः ३० प्रविवेश महा
हा पोत्री पातालं जलपूरितं अन्वेषयामास तदा रसातलमशेषतः ३१ अत्र युद्धं महाघोरं हिरण्याक्षसमा
श्रयं अभूतभूतपूर्वं च तुमुलं रोमहर्षणं ३२ चिरकालं च बाहुभ्यां मल्लयुद्धमवर्त्तत ततः क्रुद्धो महापोत्री दंष्ट्राग्रेण वसुंधरां ३३

द्विधा तं धारयामास मेरुतुल्यं महोत्तमं तदेकसंलये नैव तज्जलं रक्षमावभौ ३४ तं दृष्ट्वा मुनयः सर्वे जनलो
२ कनिवासिनः महज्जलमिदं रक्तं तदद्भुतमिदं त्वति ३५ इत्याश्चर्यविलोलाक्षाः समाधिध्यानयोगतः
ज्ञात्वा श्वेतवराहस्य प्रभावं मुनयोस्तुवन् ३६ तत्र श्वेतवराहस्य पातालतलगामिनी दंष्ट्राग्रेण सतां भूमि २
सर्वसत्त्वसमाश्रया ३७ उद्धृत्य तरसा पात्री विक्षोभ्य च महज्जलं निधाय पादयोस्तस्य भोगोपरि महाकृतिः
जनलोकं समाश्रित्य तस्थौ पर्वतसन्निभः ब्रह्मादयो देवगणाः सिद्धाश्च परमर्षयः ३९ अस्तुवन्वेदमंत्रै
श्च स्तोत्रैश्च विविधैः परैः ववर्षुः पुष्पवर्षाणि ननृतुश्चाप्सरोगणाः ४० देवदुंदुभयो नेदुर्वीणा मु
रजमर्दलाः देवा ऊचुः जय देव महापोत्रिन् जय भूमिधराच्युत ४१ हिरण्याक्षमहारक्षोविदारणविचक्ष
ण समनादिरनंतश्च त्वत्तः परतरो न हि ४२ त्वमेव सृष्टिकालेपि विधिर्भूत्वा चतुर्मुखः सृजस्येतज्जगत्स
र्वं व्याप्य विष्णुः समंततः ४३ कालाग्निरुद्ररूपी च कल्पांते सर्वजंतुषु अंतर्यामी भवान्देव सर्वकर्ता त्वमेव हि
४४ निष्कलं ब्रह्मणा रूपेन जानंति सुरास्तव प्रसीद भद्रे न भवन्भूमिं स्थापय पूर्ववत् ४५ सर्वप्राणि
निवासार्थमब्रुवन्विबुधागणाः ७ इति श्रीवराहपुराणे व्यंकटगिरिमाहात्म्ये प्रथमोध्यायः १ ७ ७ ७
सूत उवाच ततः श्वेतवराहश्च स्थापयित्वा धरां तदा विभज्य सागरान्सप्त लोकान्सप्त च पूर्ववत् १ चतुर्मु
खं समाहूय सृज पूर्वं यथा जगत् इत्युक्त्वा च महाक्रोडः सर्वयज्ञमयो हरिः २ सूर्यचन्द्रौ जगत्त्राता यथापूर्वम
कल्पयत् धरावाहकदेवांश्च लोकानुग्रहकाम्यया ३ भूमौ स्थातुं स्थलं दिव्यं बुध्या निश्चित्य माधवः गरुडं प्रे
षयामास गिरिमानेतुमद्भुतं ४ वैनतेय महासत्त्व गच्छ त्वं मंत्रिकेतनं गत्वा तु परमं धाम क्रीडाचलमिहानय ५ राम

सर्वान्पारिषदांश्चापि विष्वक्सेनमुखान्सुरान् इत्युक्तो गरुडोसौ साक्षाद्गुरुपातविहायसं ६ गतेतुगरुडेतस्मिन्नानेतुंपर्वतो
त्तमं पोत्रीसपीहरिर्भूमिं स्थापयित्वातुपूर्ववत् ७ पश्चाद्भूमिंपरिक्रम्यगोतमीतीरमागतः तस्यास्तुदक्षिणेभागेप
क्षियोजनदूरतः ८ पूर्वाब्धेःपश्चिमेयाम्यपंचभिर्योजनैर्युते देशेपुण्यजनाकीर्णेगरुडस्यास्तथोत्तरे ९ आगत्यत
स्थौदेवोपिगरुडागमनोत्सुकः वैनतेयःपरंधामगत्वातत्रददर्शह। १० अलंकृतममेयंचसर्वरत्नमयंगिरिं हिरण्म
यंमहाश्रृंगंपंचोपनिषदात्मकं ११ पुन्नागचंपकाशोकतालहिंतालशोभितं सुरद्रुममुखैर्देवैरन्यैःकांचनरूप
कैः १२ शोभितंक्षीरसंघैश्चशुककोकिलहंसकैः श्रवणानंदजननंमधुरालापसंभ्रमैः १३ मल्लिकामालती
जातीनंद्यावर्तादिभिस्तथा लताभिःपुष्पिताग्राभिर्दिव्यसौरभशालिभिः १४ सिंहशार्दूलचमरमत्तमातंगचा
मरैः शोभितंकिन्नराभिश्चगायत्किन्नरपंक्तिभिः १५ अनेकनिर्झराकीर्णमनसाल्हादकारकं मुक्तैर्नित्यैःकामरूपै
र्दिव्यरूपैश्चशोभितं १६ नारायणगिरिर्नामप्रभुआदिपरमेष्ठिनः योजनत्रयविस्तीर्णंत्रिंशद्योजनमायतं १७
शेषाकारंहरेःशेषंशेषिणंसर्वदेहिनां एवंरूपंगिरिश्रेष्ठंस्कंधदेशेनिधायतं १८ परिवारैरुपेतश्चमवेगेपरिचा
रकैः आजगाममहावेगाद्गरुडःकांचनप्रभः १९ ततश्चसंभ्रमोधात्सुरुड्वच्चैर्विहायसि पुष्पवृक्षांस्ततःसूर्यको
टिरुद्धनिभोवभौ २० तेजःकिंचित्ततःश्रीमानागतोविष्णुवाहनः आगतंगरुडंवीक्ष्यस्थापयेहखगेश्वर २१ इत्यु
वाचहरिःसोपिस्थापयामासतंतथा ततोगिरिश्वेतपात्रीमुदमापाहरिस्तदा २२ स्वामीपुष्करिणीतीरेपश्चि
मेपुण्यकानने विमलेविमलेदिव्येकोटिसूर्यसमप्रभे २३ अर्कैनैरत्नखचितेगोपुराद्भुतशोभिते रत्नस्तंभशतोपे
तेश्रीमहामणिमंडपे २४ वाचामगोचरेसर्वनयनानंदकारके मध्येविमानेप्रमोक्षःश्रीनिवासःपरात्परः २५ अतिष्ठदेवदेवोपिशंख
चक्रगदाधरः २६॥ इतिश्रीवराहपुराणेव्यंकटगिरिमाहात्म्येद्वितीयोध्यायः २ ७ ७ ७ ७ सूतउवाच

तत्र देवाः सगंधर्वा ब्रह्माद्या मुनयोऽपि च आजग्मुर्लोकपालाश्च शंकरः पार्वतीप्रभुः १ वसवः सप्त ऋषयो रुद्रादित्या
१ मरुद्गणाः तुष्टुवुश्च हृषीकेशं वासुदेवं जगत्प्रभुं २ जय लक्ष्मीश लोकेश जय भूमिधराच्युत जय विष्णो हिरण्याक्षविध्वं ३
सनविचक्षण ३ दंष्ट्राकरालवदन भ्रुकुटीकुटिलेक्षण इदं भयंकरं रूपमस्माकं घोरदर्शनं ४ ज्वलदुग्रभुजानेकपार्श्व
द्युविराजितं दंष्ट्राग्निव्यथिताः सर्वे सुराश्च परमर्षयः ५ अनुग्रहीष्व लोकं च सयात्रस्थीयतां गिरौ बिभ्यंति मानुषाः स
र्वे त्वदीयं रूपमद्भुतं ६ दृष्ट्वा वोद्विग्नहृदया भवेयुरद्य नान्नराः देवतानां मनुष्याणां वासार्थं बोधनाधरा ७ तस्मात्त्वमनु
जरक्षार्थं सौम्यरूपं विधारय ध्यानयोग्यं स्वस्मकानामस्माकानां च कर्मसु ८ अस्माकं मनुजानां च स्त्रीभृत्याणां तथैव च
दृश्यस्त्वं वरदो भक्तावसन्नित्यमिहैव भो ९ इत्युक्तस्तैः प्रसन्नात्मा सौम्यरूपश्चतुर्भुजः श्रीभूमिसहितस्तस्थौ पुंडरीकवि
लेक्षणः १० शरत्पूर्णेन्दुवदनः सर्वाभरणभूषितः श्रीनिवासः सुरान्सर्वान्समाहूयेदमब्रवीत् ११ वैकुंठात्परमो ह्येष व्यंकटा
ख्यो नगोत्तमः अत्रैव निवसाम्येवं श्रीभूमिसहितो ह्यहं १२ ददामि प्रार्थितानर्थान्मनुजेभ्यः सदा सुराः इत्युक्त्वा श्रीहरिस्तान्स
र्वान्ब्रह्मेशप्रमुखांस्तदा १३ यथार्हं समनुज्ञाप्य तत्रैवांतरधीयत देवाश्च मुनयः सर्वे प्रतिजग्मुः स्वकालयान् १४ मुनय
ऊचुः सूत पूर्वं गिरौ तस्मिन्स्वामीपुष्करिणीति वै प्रसंगात्कथिता साधु कीदृशी मुनिसत्तम १५ सा तत्र तस्या माहात्म्यं वक्तव्यं
यत्त्वयानघ सूत उवाच मुनयः श्रूयतां किंचिदुत्तरं सावधानतः १६ स्वामिपुष्करिणी रम्या सर्वपापहरा शुभा वैकुंठे
भगवत्क्रीडावापि श्रीभूमिसंमिता। १७ अपाकृतजलौघा च सुगंधा सुमनोहरा गंगादिसर्वतीर्थानां जन्मभूमिः शुभो
दका १८ आनीता विष्णुना तेन क्रीडार्थं तत्र तिष्ठति विरजाश्च रजोदोषप्रमुखाघविनाशिनी १९ ऐहिकार्थप्रदा नित्यं स्ना
नमात्रेण सर्वदा दर्शनात्स्पर्शनात्स्नानात्स्मरणात्सर्वसिद्धिदा २० स्नानादिष्टप्रदा चेति किमु वक्तव्यमंजसा तसस्तस्या
स्तु माहात्म्यं वक्तुं वेदोऽपि न प्रभुः २१ वेदेभ्यस्तत्समीपस्था मनुजा भाग्यशालिनः किं तु जानंति तस्याश्च वैभवं नैव मानुषाः २२

प्राप्तानां ज्वलनज्वालिमानुषाणामयं गिरिः तस्मात्तु तेषां भक्तिश्च मंत्राभ्यन्तिनगिरौ २३ यस्य यस्य च या भक्तिस्तस्य
सिद्धिश्च तावती स्वामीपुष्करिणीस्नानं सद्गुरोः पादसेवनं २४ एकादशीव्रतं चापि त्रयमत्यंतदुर्लभं दुर्लभं मानुषं जन्मदु
र्लभं तत्वबोधनं २५ स्वामीपुष्करिणीस्नानं त्रयमत्यंतदुर्लभं यत्तु स्वामीसरःस्नानं महापातकनाशनं २६ तत्रापि दृष्ट
बहुधा नरकासुरसूदने प्रायश्चित्तप्रवृत्तानां नराणां सुलभा गतिः २७ स्वामीपुष्करिणी पुण्या तथा काम्यस्वरूपिणी व्यंक
टाद्रेर्विशेषेण दर्शनाय च वर्त्तते २८ नित्यं नैमित्तिकं काम्यं प्रायश्चित्तं च तत्र वै विष्णोः कर्माणि पश्येति भक्तिरेषा समान
मी २९ नैमित्तिकं च कुर्वंतः स्वामीपुष्करिणीजले अंगवैकल्यदोषाश्च नस्युः स्वामीसरःस्तटे ३० वासवादिषु काम्यं च दृष्ट
मन्वपि दृश्यते बहुनेह किमुक्तेन धर्मादिकफलेषु च ३१ वांछावतां मनुष्याणां स्त्रीनराणां तथैव च सांगकर्मक्रियासि
द्धिनराणां च विशेषतः ३२ नान्या गतिर्व्यंकटाद्रेः सत्यं सत्यं वदाम्यहं ३२॥ इति श्रीवराहपुराणे व्यंकटगिरिमाहात्म्ये
तृतीयोध्यायः ३ ७ ७ मुनय ऊचुः परावरज्ञ सर्वज्ञ सर्वभूतहिते रत मुनेस्त्वमाद्यभागकिंचित्स्वच्छामिति हृद १
वराहरूपी भगवान्धरामुद्धृत्य किं पुनः तद्देवशैलेश्वेषु व्यवसत्करुणाकरः २ कालांतरेवा तत्रैव स्थितवान्सर्वदानघ ।
अकरोद्धा कथामान्वं तत्र किं दत्तं कस्य वा स्थिति ३ सूत उवाच ब्रवीमि दत्रोशेषं च शृणुध्वं मुनिसत्तमाः आसीत्पश्चेत पाल्पीह न६
मुज्जहार धरां यदा ४ तदा वानीयवैकुंठाद्वाचलं गरुडेन वै कस्मादायेवभगवान्क्षीरसागरमहोदधिः ५ विहरन्मया
सार्द्धं हरिर्निसौरसानुषु प्रकाशश्च प्रकाशश्च लिख्य वसद्गिरौ ६ यावत्कल्पं वसत्येवं ब्रह्मकं च परमेष्ठिना क
दाचित्सुप्रशीलानां दर्शनं याति स प्रभुः ७ कल्पे कल्पे च धरणीमुद्धृत्यैवमेव हि श्वेतवाराहरूपेण धरणी चोद्धृत ३
वतायतः ८ श्वेतवाराहरूपं स्वं व्याख्यातं मुनयो मया साधूनां च पदा बाधा धैर्यश्चाप्यवसीदति ९ यदा च धर्मो
प्यधिको दुष्टाश्च निरंतरं यदा तदा कालानुरूपेण नरदेवानुरूपतः १० रूपं कस्मान्महाविष्णुः संहरत्यहितान्सदा ८

४ अधर्मंसर्वमुत्सार्यसधर्मंपालयत्यसौ ११ रहस्येचहिताश्चवेदविद्याःप्रवर्तयन् स्वयंचसर्वभूतानांहृदयस्थोपितिष्ठ
त्यचित् १२ सर्वदाचोषशैलेंद्रेविहरन्नमयासह निसैर्मुक्तैश्चदेवैश्चकामरूपैश्चसंयुतः १३ तिष्ठत्येवसदात ४
स्मिंश्चकरोरव्येनगोत्तमे वैकुंठस्वर्गलोकेभ्यःस्वर्गेभ्योधिकप्रियः १४ अयंभगवतोहृद्यःपर्वतःपुण्यकाननः
मंत्रसिद्धिस्तपःसिद्धिर्यज्ञसिद्धिस्तथैवच १५ काम्यस्यकर्मणःसिद्धिरेवमन्याश्चसिद्धयः भवंत्यत्रनराणांचनच
चिरात्कालयोगतः १६ अनेनतपसाभीष्टंसेव्यत्यस्मिन्गिरौवने सर्वतीर्थानिसततंपुण्यान्यत्रैवसंतिहि १७ यएनंसेव
तेनित्यंश्रद्धाभक्तिसमन्वितः ज्ञानार्थीज्ञानमाप्नोतिद्रव्यार्थीकनकंबहु १८ पुत्रार्थीपुत्रमाप्नोतिनरोराज्यंचविं
दति व्यंगश्चसांगरूपंचपशुंधान्यंचविंदति १९ यंयंकामयतेमर्त्यस्तंतमाप्नोतिसर्वथा चिंतितस्यचसिद्धत्वाच्चिं
तामणिमिमंजगुः २० केचिज्ज्ञानप्रदत्वाच्चज्ञानाद्रिमितितंविदुः सर्वतीर्थप्रदत्वाच्चतीर्थाद्रिमितिसंजगुः २१ पु
ष्कराणांचबाहुल्याद्गिरावस्मिन्सरस्सुत पुष्कराद्रिंप्रशंसंतिनरयःसाधुदर्शिनः २२ गिरावस्मिंस्तपस्तेपे
धर्मोपिस्वामिवृद्धये तस्माद्धर्माद्रितंमुन्योवेदपारगाः २३ शातकुंभस्वरूपत्वात्कनकाद्रिंचतंविदुः द्वि
जोनारायणःकश्चित्तपःचचारमहत्तरं २४ ऐछद्रक्षस्यनाशाचव्यपरौदैत्युरारितः वैकुंठादागतश्चेनवैकुंठाद्रि
रितिस्मृतः २५ हिरण्याक्षविनाशायप्रह्लादानुग्रहायच नारसिंहाकृतिर्जज्ञेयस्मादस्मात्स्वयंहरिः २६ सिंहाच
लमितिप्राहुस्तस्मादेवंमुनीश्वराः अंजन्याचतपःकृत्वाहनुमंतंव्यजायत २७ तदादेवंसमागत्यदेवसाहाय्यका
रकं यस्मात्सुतमसूतासौजगुस्तस्मादमुंगिरिं २८ अंजनाद्रिंवराहाद्रिंवराहक्षेत्रसंभ्रमतः नीलस्यवानरेंद्रस्यच

स्मान्निर्त्यं च संस्थितिः २९ तस्मान्नीलगिरिर्नाम वदंत्येवं महर्षयः वकारोऽमृतबीजं तु करं अस्मांउमेव च ३० अमृतेश्व
र्यसंयुक्तत्वाद्व्यंकटाद्रिरिति स्मृतः अयं कदाचिद्देवान्यं श्रीनिवासस्य वाव भो ३१ श्रीनिवासगिरिं प्राहुर्वैकुंठपुरवासि
नस्तदा देवा दिवौकसः आनंदाद्रिरिति प्राहुर्वैकुंठपुरवासिनः ३२ प्राहुर्भगवतः श्रीउप्राचुर्यात्तु तथासुरः श्री
प्रदत्वाच्छ्रियोवासाच्छ्रद्धस्याश्चयोगतः ३३ रुद्र्या श्रीशैल इत्येतन्नु चास्मिंश्च गिरोवरे बहूनि चास्य नामानि युगभेदा
त्कृतानि हि ३४ यावंत्यो ह्यभगवतः कल्याणा गुणराशयः तावंतोऽस्य गिरेः संति गुणाः परमपावनाः ३५ अस्य व्यंकटशै
लस्य माहात्म्यं यावदस्ति हि तावद्वक्तुं च स्लेस्वे च न समर्थश्चतुर्मुखः ३६ षण्मुखश्च सहस्रास्य फणीदेवाः परे किमु ।
श्रुत्वा तु चैवं परमं मुनयो हृष्टमानसाः ३७ ततः स्मिमाययुस्तेपि [illegible] श्रवणकौतुकात् ३८ ॥ ७ इति श्रीवराहपु०
व्यंकटगिरिमाहात्म्ये चतुर्थोऽध्यायः ४ ७ ७ सूत उवाच गिरौ तस्मिन्वसंतं तं व्यंकटेशो नतद्रूद रस्फकंयत्तुयुष्मा
लितं तु किंचिद्दाम्भिकः १ मायिना सर्ववेशेन लीलापरवशेन च छलं च तु मत्रापेयाकेन शक्यं तपोधनाः २ स कदाचि
न्महामायी विटवेशं च धारयन् गिरावुत्तरदिग्भागे चचार रमया सह ३ तत्र केचिन्महाभागा मुनयस्तत्त्वदर्शिनः गिरे
रस्य च माहात्म्यं श्रुतवंतस्तपोधनाः ४ अयं गिरिर्महापुण्यः सर्वसत्वसमाश्रयः निर्बाधः फलमूलाद्यैः सर्ववृक्षस
मन्वितः ५ नानाप्रस्रवणोपेतो नायादिकैश्च महीरुहैः ऋद्धोत्तापसयोग्यैश्च पादपैरपि संकुलः ६ नयनानंदजन
नो हृदयाह्लादकारकः अस्माभिः सर्वदावासः कर्तव्योऽत्र महागिरौ ७ इति निश्चित्य मनसा तत्रागत्य तपोधनाः ।
चक्रुर्यज्ञं यथाशास्त्रं विष्णुमुद्दिश्य वाग्यतः ८ सोऽपि मायी श्रिया सार्द्धं यज्ञवाटमुपागमत् सुवर्णश्चित्रितं वस्त्रं वसानः
शुभदर्शनः ९ सोष्णीषश्च करेणैव वामेन छुरिकां दधत् तांबूलेन शुचिस्निग्धं मंदस्मितमुखांबुजे १० मृगोत्थमदगं
धनलुलितस्तलतिलकमुखः पुंडरीकविशालाक्षः कंबुग्रीवो महाभुजः ११ जगन्मोहनसौंदर्यः साक्षात्कंदर्पसंनिभः हेमयज्ञो

८

पवीतांगोकोमलांगोमनोहरः १२ प्रविवेशसभामग्निमध्यावृंदेमहात्मनां दृष्ट्वाचमुनयःसर्वेपुंडरीकनिभेक्षणं १३

वेश्यावेषंधारयंतिलीलांबुजकरांबुजां नवहारकसंकाशांपंकजोदरसंप्रभां १४ हरिद्रांतसमानाभांदधानांकुटि

लालकान् शरत्पूर्णेंदुवदनांतांबूलेनमनोहरां १५ कर्णांतनेत्रयुगलांबिंबाधररतिप्रभां स्वर्णतश्चसौंदर्यासाक्षा

ल्लक्ष्मीमिवस्थितां १६ दृष्ट्वातुमुनयःसर्वेविस्मयोत्फुल्ललोचनाः कोसौराजसुतस्त्वेषःपृथिवीमोक्तुमर्हति १७ द्वा

त्रिंशल्लक्षणोपेतःसाक्षाद्रामइवापरः किमर्थमागतस्त्वंतुपृच्छामइतिचाब्रुवन् १८ आवासःकुत्रतेमातोकोवानेजन

कःसुतः नामधेयंचकिंवातेब्रूहिराजन्नशेषतः १९ मायावीउवाच नाहंराजावापिश्रोवाकश्चिज्ज्ञातिश्चैवनमेन

चमातानचपितानचवासःक्कचित् २० सर्वावासःसर्वभक्षःसर्वगःसर्वरूपधृक् निर्नामानिर्गुणश्चाहंयुष्मा

न्द्रष्टुमिहागतः २१ भवंतस्तपसाश्रेष्ठावेदवेदांगपारगाः वदंतादुर्वरीसर्वांचेष्टितांचैवयासतां २२ स्पष्टांगनांक

थंतत्रसंभवेत्स्मुनयोमलाः अएवमादिक्रियापालोपष्टवानयत्तांसंसदि २३ मुनयस्तेयसंभ्रम्यवृथाकालस्तुगछ

ति इतितेत्वरिताःसर्वेसमिद्धेजातवेदसि २४ पुष्पगंधंवपाभागंचक्रुःशास्त्रोक्तमार्गतः सोपिवेगात्तत्रगत्वाशंखच

क्रगदाधरः २५ श्रीवत्सवक्षानित्यश्रीःसर्वाभरणभूषितः वपाजग्राहपाणिभ्यांकोटिसूर्यसमप्रभः २६ तद्दृष्ट्वातुमु

नयःसर्वेप्रभावात्तिमितेक्षणाः तस्थुस्तपोधनास्तत्रक्षणंचित्रार्पिताइव २७ प्रीताश्चिंतितास्सर्वेतुष्टोहृष्टैयेव

न्नुवत्त मुनयश्चतदाप्रीताःसाक्षाद्विष्णुःसमागतः २८ अस्माकंभाग्यमतुलंसफलंजीवितंचनः इतियागक्रिया

शेषंचक्रुःकौतुकसंभ्रमाः २९ एतत्सर्वंसमाख्यातंजाबालिमुनिनापुरा अन्यच्चकथितंतेनतच्चाहंकथयामि

वः ३० पुरातुव्यंकटाधीशश्चचारगिरिमूर्द्धनि सुकुमारोविशालाक्षःकोमलांगोमहाबलः ३१ रहःकश्चिद्विजो

८

दृष्टस्तेन जर्जरितो लुलितः मंददृष्टिर्भग्नजानुः सुक्षामः परिपीडितः ३२ मार्गभ्रष्टो वने तत्र कुत्र चिच्छैलमाश्रितः कच्चाग
तोऽसि कौण्डिन्य त्यक्त्वा नष्टं विहाय मां ३३ इति जल्पन् शुष्कमुखकण्ठजिह्वोष्ठतालुकः पृष्टस्तेन कुमारेण किमर्थमिह जल्पसि ३४
न कश्चिद्दृश्यते मनुजः कौण्डिन्यः कुत्र तिष्ठति इत्युक्तः प्राह वृद्धस्तु तस्यासीत्तनयो न वा नहं ३५ कथं गच्छाम्यहं तावदाश्रमं दूरतः स्थितं ।
शौचाचारक्रियाशून्यं रिक्तं बुद्धिविवर्जितं ३६ किमर्थं स्थापयसि त्वं लोके मां दुर्बलं विधे कुमारः प्राह तं वृद्धं सोपहासमिदं वचः ३७
तव विप्र शरीरं च जरितं पलितं तथा ३८ लंबते पक्ष्मणी सं च न च पश्यसि किंचन + एवं ब्रुवंतं तं स्मिंस्तु निर्हेतुकदयानिधिः ३९ +८
अतः परं च विप्रेन्द्र जीवितेच्छा तवास्ति किं ३९ न वा पूर्वोक्तवाक्यं तु स संवावदस्तु अत इत्युक्तः प्राह विप्रोऽपि नास्ति क्षीणजीविते मम ४०
किं तु नित्यानि कर्माणि ज्योतिष्टोममुखानि च नानुष्ठितानि देवानामृणी कथमहं पुनः ४१ स्नास्यामि देहं चित्ते तिसत्यमेतद्ब्रवीमि ते ।
इत्युक्तः प्राह तं विप्रं गृहाणेमं करं मम ४२ सोऽपि जग्राह तं शीघ्रं स्नाने तेन जगाम ह किंचित्प्रस्रवणं दिव्यं कुमारः प्राह तं द्विजं ४३
स्नानं कुर्व त्वं गच्छ च त्वमाश्रमपदं पुनः इत्युक्तो ब्राह्मणस्तत्र निमज्य पुनरुत्थितः अभूदभूतपूर्वश्च कुमारः षोडशाब्दिकः ।
कुमारोऽपि सहस्राक्षः सहस्रवदनोऽभवत् ४५ सहस्रमग्निबिम्बाभः सहस्रभुजमण्डितः तत्र देवाः समाजग्मुराकाशे विस्मिताः
पुनः ४६ पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभयस्तदा नेदुः सर्वेऽपि तं देवास्तुष्टुवुः स्तोत्रसत्तमैः ४७ देवः प्राह द्विज वृद्धं कुरु
कर्माणि सर्वतः कर्मानुष्ठानसिद्ध्यर्थं धनं दत्तं चेतवध्रुव ४८ इत्युक्त्वा तं द्विजश्रेष्ठं तत्रैवांतरधीयत संश्रय देव
ताः सर्वाः प्रोचुर्वाक्यमिदं तदा ४९ अयं वृद्धः कुमारोऽभूद्यस्मात्तस्मादियं नदी कुमारधारका चेति लोके ख्यातिं ग
मिष्यति ५० त्रिकालमत्र यः स्नाति त्रिमासं विजितेन्द्रियः वलीपलितनिर्मुक्तो वज्रकायो भवेन्नरः ५१ इत्युक्त्वा
त्रिदशाः सर्वे जग्मुर्विस्मयमानसाः जाबालिना निकथितं तदुक्तं भवतां मया ५२ इति श्रीव° ख्यं क° पं° त्रयोऽध्यायः ९

सूत उवाच वाल्मीकिर्नाम महर्षिणा किंचिदुक्तं श्रुतं मया तदुच्यते मया यूयं शृणुध्वं मुनिसत्तमाः १ सकाश्यां सोमवंशीयः शं
खनः पृथिवीपतिः अनेकदेशसहितं बहुविस्तारसंयुतं २ परंपरागतं राज्यं चक्रे स्वं उपराक्रमैः सकश्चिन्महाराजा हृतपुण्यवि
पर्ययात् ३ सामंतराजभिः सर्वैर्हृतराज्यो महीपतिः तस्मात्कांच्याः समायुक्तो काश्यान्निर्गत्य दुःखितः ४ दक्षिणां दिशमासाद्य
रामसेतुं ददर्शह तत्रस्थात्वाकानैः पश्चात् राजगामममहीनदी ५ सुवर्णमुखरी तत्र स्नात्वा तत्तीरतः पंपसरस्समाश्रित्य स्नानं
६ चकार सः ६ नित्यं च विधिवत् स्नात्वा वसन्दुःखपीडितः राज्याद्भ्रंशो वनेवासः स्वामित्वं च हृतं परैः ७ पराधीनं महादुःखं मरणं हातिरि ६
च्यते भविता जीवनं कस्मात्कथं वा गच्छामि कां गतिं ८ इति शोकसमाविष्टो निद्रावशमुपागतः अशरीरा जागदेनं तदानी शोकपीडितं ।
९ माशुचस्त्वं महाबाहो धैर्यमालंब्य बुद्धिमन् इतोन्तरदिग्भागे क्रोशमात्रे महागिरिः १० व्यंकटाचल इत्येव प्रथितः पृथिवी
तले आपन्नकामधेनुर्यः शोकार्त्तानां सुरद्रुमः ११ चिंतामणिरियार्त्तानां तत्रास्ते कमलापतिः निर्हेतुकदयात्पूर्णोभिमताना
मिष्टदः सतां १२ तत्रास्ते पुष्करिणिका चित्रफुल्लपंकजमंडिता स्वामिपुष्करिणीत्येव नाम तस्य शुभोदका १३ तत्पश्चिमतटाश्र
मा महावाल्मीकिमुनीश्वरः उत्तिष्ठ तत्र गच्छ त्वं तत्र निरकुटिकां कुरु १४ तत्र स्थित्वा त्रिसंध्यं त्वं तत्रैव स्नानमाचर तत्र स्थितो व्यंक
टेशं भावयित्वा च बुद्धितः १५ चतुर्भुजं शंखचक्रदधानं वरदं हरिं अभ्यर्च्य यं मासषट्कं च नियममास्थितः १६ निवसत्वं म
हाबाहो स्वामित्वं प्राप्स्यसि ध्रुवं तच्छ्रुत्वा वचनं तस्य गतशोकः प्रसन्नधीः १७ आरुरोह गिरेः शृंगं पुण्यं परमपावनं चंपकाशो
कपुन्नागचूतधात्रीसमन्वितं १८ चंदनागरुहिंतालरक्तचंदनशंगकं चमरीमृगसाहस्रकेसरिमृगसेवितं १९ शुककोकि
लसंनादमयूरस्वनशोभितं एवं मनोहरं शृंगं मासस्य पक्षनकोत्तमं २० मृगयामास तत्तीर्थं विचिन्वंस्तत्र तत्र तु ददर्श सरसीं तत्र निर्म
लस्फटिकोपमां २१ तिलकाशोकपुन्नागबकुलैश्च विभूषितां रंभोपवनसंबाधां रक्तराजीवशोभितां २२ मत्स्यकच्छपसंबाधां
सीरस्थनसुशोभितां पुष्पितां भ्रमरोपेतां वहीणाहृष्टनादितां २३ तिलकैर्बीजपूरैश्च परमुक्ताद्रुमैस्तथा पुष्पितैः करवीरैश्च
मांदारैर्निचुलैस्तथा २४ अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः अन्यैश्च विविधैर्वृक्षैः पुष्पितैश्च मनोहरैः २५ स्वामीपु
ष्करिणीं दृष्ट्वा प्रमुमोद महामुनिः छायाकुटिरकं तत्र निवासमकरोद्बुधः २६ स्नानं निषेवनं कुर्वन् व्यंकटेशं समर्चयन् प्रतीच
नियताहारो मासषट्कमथर्त्तत २७ ततः स्वामीसरोमध्यादुत्थितं चमहाद्भुतं अनेकसूर्यसंकाशं त्वाजयं च विद्योदरा २८ श्रीराम

दिव्यं विमानं तत्रैव देवदेवः श्रियः पतिः शंखचक्रगदापाणिः श्रीभूमिसहितः परः २९ ततो देवाः समाजग्मुर्ब्रह्माद्या मुनयोऽपि च सिद्ध
विद्याधराश्चैव किंनराश्च दिशाधिपाः ३० वसवः सप्तमुनयः साध्या रुद्राः समागताः भेरीमृदंगवाद्यानि नेदुश्चाकाशवर्त्मनि ३१ गीत
नृत्यं च वाद्यं च चक्रुः सर्वाश्च देवताः तुष्टुवुः परमोदारैर्वेदमंत्रैर्दिवौकसः ३२ ससंभ्रमं समुत्थाय शंखणः प्रणिपत्य च स्तुत्वाथ देवदेवा
पव्यजिज्ञपयद्विदं नृपः ३३ देवदेव जगन्नाथ जगद्रक्षणतत्पर भवद्दत्तं क्षमायां तं स्वामित्वं मम केशव ३४ हृतं राजभिराक्रम्य राज्या
द्भ्रष्टोस्मि भाग्यतः रक्ष मां करुणासिंधो महोदार जगत्पते ३५ न जाने व्रतशीलं च नियमं वा जपादिकं दिष्ट्या दृष्टो मया स्वामि
न्नमोघं दर्शनं तव ३६ इत्युक्तः कालमेघाभो बभाषे तं श्रियःपतिः श्रीविष्णुरुवाच आशु तुभ्यं मया दत्तं स्वामित्वं सर्वमागतं ३७
यस्मात्त्वमाहाभक्तिः स्वामीपुष्करिणीजले ये केचन समागत्य स्नानं कुर्वंति सर्वदा ३८ स्वामीपुष्करिणीतीर्थे स्वामित्वं प्राप्यते नरैः
तेषां क्रमानुपुण्येन स्वामित्वं तरतम्यतः ३९ अस्तु तेषां पराधीनभावलेशः कदाचन सद्यं गच्छ महीपाल कुरु राज्यमकंटकं ४० सम
स्तदेवदेवानामित्युक्त्वांतरधीयत स्वामीपुष्करिणीशब्दो रूढस्तस्मिन्सरोवरे ४१ व्युत्पत्तिः कथिता पूर्वं तीर्थानां स्वामिनी यतः स्वा
मीपुष्करिणी प्रोक्ता तस्माद्धि पुरातनैः ४२ प्रोक्तेदानीं भगवता व्युत्पत्तिः सत्यसंमता स्वामित्वाच्चैव तीर्थानां स्वामीपुष्करिणीति
यं ४३ अहो महत्त्वं तीर्थस्य दर्शनं पापनाशनं धन्यास्ते ते महाभागा एतत्तीरनिवासिनः ४४ इत्युक्त्वा त्रिदशाः सर्वे ययुः फुल्लह
दंबुजाः शंखणोपि महाराजा सभार्यो हृष्टमानसः ४५ अवरुह्य गिरेस्तस्माच्छनैर्देशं जगाम ह तद्राज्यवैरिणः सर्वे परस्प
रजिगीषया ४६ मम राज्यमिदं राज्यं मम वास्त्विति धृतायुधाः अन्योन्यसंहताः संतः परिक्षीणाः स्वजातिभिः ४७ मध्ये स्माकं न प
श्चाभि राज्यं तस्य वत्स भवेत् इति निश्चित्य मनुजाः प्रेरिता राजभिस्तदा ४८ नगरायरीतीरदेशे शंखणं ददृशुर्नराः तव राज्यं
महाभाग तव हस्तं च राजभिः ४९ आगच्छ कुरु स्वराज्यं त्वमित्युक्तस्तैर्महीपतिः स्वकं देशं ययौ राजा कांभोजं नाम तत्क्षणात् ५०
तेपि सर्वे च राजानः शंखणं च वरासने स्थापयित्वा जलैः पूतैरभिषिच्य ययुः पुमान् ५१ सोपि स्वदेशमासाद्य स्वामित्वं प्राप्य पू
र्ववत् व्यंकटेशप्रसादेन चक्रे राज्यमकंटकं एतं रहस्यं तीर्थस्य मुनयः कीर्तिपावनाः ५२॥ इति श्रीवं० ख्यं० षष्ठोध्यायः ६ ७ ७

सूतउवाच वाल्मीकिनामहर्षीणा उक्तमुक्तंमयापितत् अन्यच्चतेनकथितंवक्ष्यतेशृणुतांतथा १ मध्यदेशेद्विजःकश्चिदा
त्माराम इतिश्रुतः माहात्कुलेप्रसूतश्चदेवब्राह्मणपूजकः २ पिताचतस्यप्रथितःपृथिव्यांब्राह्मणोत्तमः अत्यंतविदुष
७ कश्चवेदवेदांगपारगः ३ असावपिपितुर्नित्यंससर्वविद्वद्गुरिग्रहः पितर्यपरतेतस्यक्रमात्पालंधनंगतं ४ वृत्तिश्चशिथिला
जाताप्रज्ञयातीनचकुत्रचित् माहात्कुलेप्रसूतस्यममेपंचहितिरीदशौ ५ परिकीर्तिश्चहाचेयंसर्वेषांममसर्वथा किंकुर्मःक्वगच ७
छामिइतिचिंतामहाबुधो मग्नःग्रामेजगामाप्तुंव्यंकदाद्ंःसमीपकं आगत्यकापिलंतीर्थंकपिलेश्वरसंनिधौ ७ तत्रस्नात्वा
नदारम्यंतीर्थमादंशोसमच क्रमेणस्नातुमारेभेआरुह्यगिरिमुत्तमं ८ स्नानेनगतपापश्चशुचिर्नैर्मल्यसंयुतः अधित्यकाया
मासीनंभिन्नंताशोकपरायणः ९ तत्समीपगुहामध्येध्यानयोगपरायणं सनत्कुमारयोगींद्रंददर्शज्वलनोपमं १० दृष्ट्वैव
महायोगीवेत्तिसर्वमयंबुधः पृच्छाम्येनंहितंकिंचिद्दितिमत्वाप्रणम्यतं ११ निरयादिवदुःखेनदुःखितःसर्वपापकृत
त्वामहंशरणंप्राप्तस्त्वंवेत्थभूरिमेहितं १२ इतिभ्रमोपपातासावष्टांगंतस्यसंनिधौ सोपिध्यायंचिरंकालंव्याजहारमिता
क्षरं १३ उत्तिष्ठवत्सकिंतेप्रिषकृत्वाघोरंपुरावने पापमस्मिन्भवेत्यंकेतस्माच्छोचसिकिंमुधा १४ पुरातुरानविप्राश्चभ्रत्कह
श्चप्रलियहे सुखस्थितानांपीडाचत्वयानानाविधाकृता १५ किंचित्कैश्चिद्द्विजेभ्योवादत्तंवित्तंनतुत्वया गृहक्षेत्रापहर्त्या
न्यंवत्स्यमाभेरणंतथा १६ अनाचाराःकृतास्तत्रनचा- रत्नवस्त्रया प्रणतोर्तिहरेविष्णोःप्रणतामीष्टदायिनी १७
नकृताभक्तिरेषाचकथंत्वोत्स्यंभविष्यति तथाप्यस्तितवोपायोयद्यहंशृणुसादरं १८ इतिश्रुत्वामतंभक्त्यावचोश्रायकृ
तांजलिः दुःखसागरमग्नस्यममपोतइवान्वितः १९ निधिर्यथानिर्धनानांरोगीणांवायथाभिषक् आतपम्लानसंस्था
नांयथावृष्टिस्तथाभवान् २० तथामयाभाग्यलेशाद्दासस्त्वंतुदयानिधिः रक्षमांपापिनंघोरंदययायेक्षस्वचप्रभो २१
इत्युक्तःप्राहयोगीन्द्रःकारुण्याब्धितरंगितः महद्दस्यतत्साथंशृणुवत्सेतितंबुधः २२ सनत्कुमारउवाच दयालोलतरं
गासीपूर्णचंद्रनिभानना जननीसर्वलोकानांमहालक्ष्मीर्हरिप्रिया २३ सर्वपापहरासैवप्रारब्धेनचकर्मणा संदत्तातुक्षमा

सैवसर्वसंपत्प्रदायिनी तस्याव्यूहप्रभेदाश्चलक्ष्मीःकीर्तिर्जयेतिच २५ तत्रव्याव्यूहलक्ष्मीःसामुग्धकारुण्यविग्रहा अना
यासेनसालक्ष्मीःसर्वपापप्रनाशनी २६ सर्वैश्वर्यप्रदासैवतस्यामंत्रमिमंशृणु वेदादिमायेवालक्ष्मलक्ष्मीननिपदंभजेत् २७
परमेतिपदंचोक्त्वालक्ष्मेतिपरमंतपः चिद्धेनुक्लादस्थितायैस्यामायाप्रीतागिरिन्नातत: २८ यत्किर्जायेतिमंत्रोयमष्टिष्ठार्थसुरद्रु
मः छिन्नुजाव्यूहलक्ष्मीःस्यादृद्धपद्मासनप्रिया २९ श्रीनिवासांकमध्यस्थासुतरांकेशवप्रिया तामेवशरणंगच्छसर्वभावेनसे
खरं ३० इतिमंत्रमुपादिश्यदर्शनचकुरुचित् ततोसौविस्मितश्चैवसंतोषपुलकांकितः ३१ अघमेरजनीव्युष्टाभुमजन्म
चतस्फलं इतिलब्ध्वाचिर्मंत्राजपन्नारत्नपर्वतं ३२ तत्रलब्धगिरौपश्यन्सरान्पर्वतनिर्गतान् स्वामीपुष्करिणींप्राप्यशान्तेर्दि
व्यांमाहाद्भुतां ३३ आकाशादवरुह्यैवस्थितोमंदाकिनीमिव विजेरेमिवपापघ्नीपुण्यदांपुण्यसेवितां ३४ आसारामस्तदा
तत्रसस्नौशास्त्रयथाविदं स्नानेकृतेतस्यदेहोभारपातेतथालघुः ३५ ततउत्थायपस्पुण्यं ददर्शवनमुत्तमं तत्रदृष्टमह
दुमर्विमानंसिद्धसेवितं ३६ अनेकगोपुरोपेतंमंडपानत्यसंकुलं अनेकरत्नखचितंतसहाटकनिर्मितं ३७ गंधर्वनग
रप्रख्यंदृष्टिचित्तापहारकं वेणुवादित्रसंपूर्णसुरसंघनिषेवितं ३८ किमिदंनिर्जनेदृष्टंवनेस्मिन्महदद्भुतं इतिविस्मयसंपु
ल्लहृदयांभोरुहस्तदा ३९ दृष्टुंविमानंतंदिव्यंपपुःपुण्यफलोदयः ददर्शनत्रफुल्लाब्जनयनंव्यंकटेश्वरं ४० शंखचक्रध
रंश्रीशंवरायतनहस्तकं किरीटमुकुटोपेतंकुंडलाभ्यांविराजितं ४१ सर्वाभरणसंपूर्णंपीतांबरधरंविभुं कोटिकंदर्पला
वण्यंश्रीभूमिसहितंपरं ४२ त्वमेवपरमंधामत्वमेवपरमागतिः त्वमेवजगतांस्रष्टायाताहर्तामहेश्वरः ४३ इतिस्तु
तंश्रीवेनैवविधिनापिस्तुतंतदा प्रणम्योत्थायसंतोषास्रोतुंगद्गदकंठवान् ४४ सर्वंत्वमेवजानासिसर्वात्मन्त्वांनमाम्यहं इ
तिप्रणम्यभूयोपितत्समीपस्थस्थितोयतः ४५ सर्वज्ञःकरुणारूपीयोगिनिवासःपरात्परः आज्ञासुग्धंचतंप्राहुर्नानैषीर्मोभु
चपुनः ४६ श्रांतंत्वयाकृतंसर्वैश्चव्यूहलक्ष्मीविमर्शनात् ऐश्वर्यंसुमहद्दत्तंदीर्घकालानुबंधकं ४७ दीर्घमायुश्चतेदत्तं
मारोग्यंज्ञानशीलता मयादत्ताद्विजश्रेष्ठभुंक्ष्वभोगान्बहूनपि ४८ एवंब्रुवतिदेवेशेप्रणनामपुनश्चतं उत्थायश्रयोदेवं

चचापश्यसुपुण्यकाननं ४९ अतिभीतः परिक्रम्य सरस्तीरं विमृश्य च स्वप्नो वा तिभ्रमो वापि माया वा सत्यमेव वा ५० न जाने
देवदेवेश सत्यमेतद्भवेदिति एवं ब्रुवन्द्विजस्तस्मादवरुह्य गिरेस्तदा ५१ पर्वते व्यंकटाद्रेस्तु वासं चक्रे प्रसन्नधीः यथेप्सितं तु
८ खं भेजे दीर्घकालं द्विजाग्रणीः ५२ इति वाल्मीकिना पूर्वमुक्तमुक्तं मया पुनः ५२॥ इति श्रीवराहपुराणे व्यंकटगिरिमाहात्म्ये
सप्तमोध्यायः ७ ७ ७ ७ ऋषय ऊचुः वराहादिकथानर्णां श्रोतॄणाममृतोपमां वैकुंठादिकथां श्रोतुं न्यूयसस्त्वच्छा
यिवर्त्तते १ दश सप्त च तीर्थानि विष्णुते कनकाचले इति पूर्वं त्वया सूत कीर्त्तितं च प्रसंगतः २ अहि तेषां च तीर्थानां माहा ८
त्म्यं पुण्यवर्द्धनं इति पृष्टः पुनः प्राह मुनीनामपि सादरं ३ सूत उवाच तीर्थानां चैव माहात्म्यं तेषां वक्तुं च कः क्षमः न श
क्यंते शतवर्षेस्तु तेषां मुच्यतेभूयतां च तत्व ४ गिरेरधः प्रदेशे तु कपिलं लिंगमुत्तमं पाताले पूजितं पूर्वं कपिलेन महात्मना ५ क
यंचित्कारणात्तत्तु लिंगं परमपावनं भित्वा च धरणीं पूर्वं निर्गतं पूजितं सुरैः ६ तल्लिंगं स्थापितं ब्रह्मा प्रार्थितं सर्वदैवतैः तद
ग्रे तु वसुधां भित्वा कपिलेन निर्गतो पुरा ७ तद्दिष्ठं कापिलं तीर्थं सर्वपापप्रनाशनं तदूर्ध्वदेशे शाऋस्य तीर्थं परमपावनं ८ अह
स्यासंगसंभूतः शापमोक्षश्च यत्र तत विष्वक्सेनसरस्तस्मादूर्ध्वं पुण्यविवर्द्धनं ९ वरुणस्यात्मजो यत्र तपः कृत्वा सुदुश्च
रं सारूप्यं च हरेर्लब्ध्वा सेनापत्यमवाप च १० पंचायुधानि तीर्थानि तदूर्ध्वं श्रोनिसत्तमाः तदूर्ध्वमग्निकुंडं स्याद्दूरतो
तथोपरि ११ ब्रह्मतीर्थं ब्रह्महत्यामोचनं पुण्यवर्द्धनं मुनीनां चैव सप्तानां पुण्यतीर्थानि संस्कृत १२ बहुशो घिकफलं तेषां ती
र्थानामुत्तरोत्तरं यत्तेषां चैव माहात्म्यमप्यावक्तुं न शक्यते १३ पुरा किल द्विजः कश्चित्तीर्थयात्रा सतो यमः तमाह कमलाधी
शः किमर्थं गच्छसि द्विज १४ अस्मिन्पुष्कलशैलेन्द्रे संति तीर्थानि सप्त च दश तीर्थानि तत्रैव घं कापिलसरउत्तमं १५
स्नात्वा चैतेषु विप्रेन्द्र शास्त्रोक्तस्नानपूर्वकं सर्वतीर्थफलं पुण्यं प्राप्स्यसि त्वं न संशयः १६ इति श्रुत्वा द्विजः पूर्वं स्वप्ने चोत्था
य च द्विजः निवृत्य तीर्थयात्रायाः प्राप्य श्रीव्यंकटाचलं १७ तेषु तीर्थेषु दश सप्तसु क्रमयोगतः स्नात्वा तथैव तत्सर्वं प्रा
सवानिति विश्रुतं १८ तिस्रः कोट्यार्धकोटी च तीर्थानि भुवनत्रये तेषां प्रकृतिभूतानि तीर्थान्यस्मिन्हरेर्गिरौ १९ राम

अस्मिन्नद्रेर्दक्षिणे यस्य वांछायद्यस्य सोऽपि च सर्वतीर्थमयं सर्वपुण्यक्षेत्रमयं हरिः २० व्यंकटाद्रेर्नगं कुर्यात्स्याद्दक्षिणमनुत्तमं अस्मिन्न
दक्षिणे पुण्यं तत्पुण्यं समवाप्नुयात् २१ व्यंकटाचलशृंगाग्रे दृष्टमात्रेह लाबुधः तीर्थयात्राफलं लब्ध्वा सत्यानि निःश्रुतं २२ पांडु
वा धर्मपुत्राद्याः इच्छन्नाक्लिष्टकर्मणा उपविष्टाः समागम्य व्यंकटाख्यं नगोत्तमं २३ कस्मिंश्चित्पुण्यतीर्थे हि क्षेत्रपालनिरक्षिते ।
कुर्वन्तः स्नानपानादि स्यवसन्त्यब्दमात्रकं २४ तदा कदाचिदस्मिन्नपि दर्शस्यमनुत्तमं तस्मादस्मिन्महातीर्थे स्थितं वत्सरमात्रकं २५
अनेन पुण्ययोगेन भवतः क्षीणकल्मषाः पुत्रे जयं तथा राज्यं प्राप्स्यथेति श्रुमागतं २६ तदाप्रभृति तत्तीर्थं पांडवं चेति बुधाः ज
राहरं बलिघ्नं वरसायनमिति त्रिकं २७ तीर्थानां वर्तते तस्मिन् भिन्नं तामणिगिरौ सदा स्वामिपुष्करिणी पूर्वदक्षपश्चेतगह्वरे २८
द्वात्रिंशच्छरपातं तु कंतुमायालिरोहितं न जानंति बुधास्तीर्थं तत्तु विस्मयकारकं २९ अष्टानां खनयः संति लोहानां कनकाचले
युगभेदेन दृश्यंते नराणां पुण्यकर्मिणां ३० व्यंकटाद्रिपरा भक्तिं वहतां भ्रांतिदो गिरिः पंगुर्जंघालएवस्यादचक्षुः पद्मलोचनः ३१
मूकोवाचस्पतिर्दूरश्राविता बधिरो भवेत् वंध्या रक्तबहुपुत्री निर्धनः सधनो भवेत् ३२ एतत्सर्वं गिरौ भक्त्या मात्रेणैव भवेद्ध्रुवं
न च तोऽय्यं कदाद्रेस्तु स्वरूपं वेत्ति कः कविः ३३ श्रीनिवासगिरिश्चायं कदाचित्काननं गिरिः कदाचिज्ज्ञानरूपं च कदाचिद्वज्रपूर्वकं ३४
श्रीनिवास भगमाति कदाचिद्भूषणोज्वलः कालभेदेन केषांचित्साक्षात्कृतः शैलरूपधृक् ३५ अस्मादस्य गिरेः पुण्यं माहात्म्यं वेत्ति कः पुमान्
श्रुतेष्वपि किंचिदुक्तं युष्मयोग्यं भवतामिदं ३६ श्रुतं च सर्ववृत्तांतं वक्तुं शक्यं मयानघ ३७ इति श्रीव्यंकट० अष्टमोऽध्यायः ८ ७७
मुनय ऊचुः व्यंकटाद्रिकथा पुण्या जन्मकर्मरसायनी शृण्वतां नास्ति तृप्तिश्च मुने ब्रूहि बुधोत्तम १ भूयः कथय वृत्तांतं श्रुतेयच्चत्वयापुरा इत्यु
क्तः प्राह सूतोऽपि श्रुतं जैमिनिपुंगवात् २ सूत उवाच पुत्रो दशरथस्यासीद्रामो राजीवलोचनः स सर्वलक्षणोपेतः सर्वशास्त्रविशारदः ३
रावणस्य वधार्थाय पुरा सौमित्रिणा सह हनूमता वज्रवता सुग्रीवेण महात्मना ४ स हरिसैन्यैर्यदा यं पातालीराच्छिन्नितपादपान्
निर्जगाम यदा रामस्तदा श्रीव्यंकटाचले ५ स्वामिपुष्करिणीतीरे स्नात्वा पश्चाद्रणे रिपुं रामेण रावणं हत्वा जयमास इति श्रुतं ६
न सर्वं कथयिष्यामि श्रोतव्यं सावधानतः शेषाचलसमीपे तु यदा रामस्तदागतः ७ तदा सत्यं जनी देवी वायुसूनोर्महात्मनः ।
अंजनीपुरतो गत्वा रामं राजीवलोचनं ८ नमस्कृत्य महाभागा इदं वचनमब्रवीत् प्रतीक्षं तीमाहा बाल्यदागमनमनुत्तमं ९

स्वास्यंत्यस्मिन्वीरोराममुनयोप्यपिचकानने तपःकुर्वंतिसततंसदागमनकांक्षया १० तान्सर्वान्त्समनुज्ञाप्यगंतुमर्हसिसुव्रत इत्युक्तः
प्राहरामोपिहनुमन्मानरंप्रति ११ श्रीरामउवाच कालात्त्वयोक्षैवेदेवीमयिनत्रसमागते ममेदानींवरारोहेकार्यस्यमहतीत्वरा १२
पुनरागमनेदेवीलथाभेवनुयानगिरि इत्युक्तेराघवेणेतद्वाक्यंस्सामारुधुतिः १३ हनुमान्क्षणलोत्रत्वाचाक्यंतदुवाचह
स्थातव्यमघसहसायत्रकुत्रापिसर्वथा १४ यस्माद्धांतामाहासेनावानराणांतरस्विनां अथचमार्गेवाद्भिःसदापुष्पफलद्रुमः १५
बहुभस्त्रवणोपेतोबहुकंदरसानुमान् सुस्वादुफलमूलोयमंजनाद्रिरनुत्तमः १६ मधूनिसर्ववृक्षेषुबहूनिगिरिकंदरे वेह
सर्वमालाबाहायथेच्छंसितथाकुरु १७ इत्युक्तोवायुपुत्रेणश्रीरामःप्रहसन्निव जानेहमंजनीसूनोतथापिवचनंनव १८
श्रोतव्यंचमाराबाहोगच्छचाग्रेकपीश्वर इत्युक्तोवाहिनीतांचकर्षन्पर्वतमाययो १९ नागकेसरमाकरपुन्नागतरुशोभितं
चंपकाशोकबकुलचूतकिंशुकशोभितं २० मयूरसारिकारावैःकोकिलानांस्वरैरपि शुकमंजलनादैश्चकपोतस्वनहूलतैः २१
शोभितंफलपुष्पैश्चव्यंकटाख्यंनगोत्तमं त्रिलोमानामलःकश्चिद्विप्रोवेदविदांवरः २२ स्वयंभुवंसमुद्दिश्यप्रमलोकजिगीषया
तपश्चकारधर्मात्माचिषापुनरद्रिगतः २३ आगत्यभगवान्ब्रह्मालमाहद्विजसत्तमं रामंदृष्ट्वासमेतोसित्वंममलोकमवाप्स्यसि २४
इत्युक्तोब्रह्मणापूर्वंदृष्ट्वारामंपरात्परं फलमूलाशनेस्तंचपूजयित्वातमब्रवीत् २५ चिरकालार्जितंस्वामिन्फलितंनपउत्तमं
अद्यमेसफलंजन्मचन्मुखांभोजदर्शनात् २६ अनुज्ञापयमांरामब्रह्मलोकंप्रतीश्वर इत्युक्तःसतुधर्मात्मातथाकुरुद्विजोत्तम २७
इत्युक्तोतादृशंविप्रमारोहद्वैनगोत्तमं शापमोक्षंचयक्षीणांकेषांचित्सर्वतोत्तमं २८ दृष्टारामोजनादृश्यांआश्रमंपुण्यवर्द्धनं
आकाशगंगानिकटेप्रतिपधेमाहात्मना २९ तयाचपूजितःसम्यक्सर्वेदद्यावरोत्तमं आपृच्छतांमाहाभागांस्वामीपुष्करिणीययौ ३०
तत्ररामोमहातेजाःसौमित्रिर्मारुतात्मजः सुग्रीवश्चांगदश्चैवजांबवान्नीलएवच ३१ चक्रुःस्नानंमहातीर्थेसर्वत्रविजयप्रदे
फलमूलानिचानीयरामोधर्मभृतांवरः ३२ चकारदानंतत्रैवमुनिभ्यःशास्त्रवर्त्मना तस्मान्नकृत्यमागेचकुर्वंछुद्धापृथक्पृथक् ३३
सुस्वादुफलमूलानिमधूनिचबहूनिच आनीयवायुपुत्रस्तंपूजयामासराघवं ३४ ततोरामःसंप्रहृष्टःसुग्रीवप्रमुखैःसह

न्यवसत्सुखं रामः स्वर्गेहमिव तत्रवै ३८ वानराश्च महात्मानो गोलांगूलास्तथैव च संपश्यन्तमनुजा नित्युच्चानि च फलानि च ३६
मधूनि स्वादु नीर्थानि भक्षयन्तो नानाकेशराः न क्षयित्वाम् दाम्नतोश्वेरस्तत्र सहस्रशः ३० आप्लवंतः प्लवंतश्च नमंतश्च प्लवंगमाः
गांगाङ्गिरिगिरेस्तत्र रक्षाद्रुक्षवनाकुले ३८ चेरुस्तत्र वानराः सर्वमधुना बलगर्विताः केचिदारुरुहुस्तत्र वानरान्वानरोत्तमाः ३७
कांश्चित्सुखप्रदेशान्गृहीत्वा वानरोत्तमान् वानराः कर्षयेत्कांश्चित्केचिद्वल्कानि चुचुंबिरे ४० अथागिरौ च वणे सर्वे हन्यामसुखसुरक्षणं उं
कांवासलतोत्साघ त्रिकूटं वामहगिरिं ४१ आनेष्यामो वयं सिंधुं बहुनक्रसमाकुलं तं रामं बहुवेगेन गृह्णीयांश्चन्द्रभास्करौ ४२ पाटया
६ कं यगिरीन्सर्वान्रामार्थे भ्रसुतापि पातालं वा महलोकं विज्ञामारसातलं ४३ गच्छामो रावणोपत्र तिष्ठत्वविनयान्वितः तमेव
हन्मः श्रेरं चसगणं देवकंटकं ४४ चिरायते किमर्थं वा रामः परमधार्मिकः इति ब्रुवंतस्ते सर्वे वानराः पर्वतोत्तमे ४५
तस्मिन्दिव्ये महापुण्ये व्यंकटाद्रौ वनेचराः कोटिकोट्यर्बुदास्तत्र पराधबलशालिनः ४६ परस्परमसंबाधं न्यवसन्सुखं गिरौ १
अहो गिरिप्रभावोयं वर्णनीयः कथं बुधैः ४७ इति श्रीवराहपुराणे व्यंकटगिरिमाहात्म्ये नवमोध्यायः ९ ७ ७ सूत उवाच
स्वामीपुष्करिणी यत्र तत्र ईशानभागतः गजो गवाक्षो गवयो शरभो गंधमादनः १ मैंदश्च द्विविदश्चैव सुषेणश्च महामतिः
कांचित्गुहां तमोगर्तां प्रविष्टास्तत्र वानराः २ उन्निद्रनेत्राः सर्वेपि विहीनाः शाद्वौजसा जग्मुस्तुतमसाविष्टां सुदूरां तां गुहां तदा ३
ददृशोत्रमहाज्योतिः सूर्यकोटिरिवोदितं ज्योतिर्गेणगतं डिनामिवमलं चमाबभौ ४ तत्र काचित्पुरी रम्या तप्तहाटकनिर्मिता कपाटनां५
तोरणवती रम्या धानवनैर्युता ५ शुद्धस्फटिकनैर्मल्यजलनघसमावृता रत्नमाणिक्यवैडूर्यमुक्तानिर्मितगोपुरा ६ अनेक
मंडपैर्युक्ता प्रासादध्वानसंवृता महातीर्थशतोपेता रथमातंगसंकुला ७ वननारीगणोपेता सर्वाभरणभूषिता शंख
चक्रधराः सर्वे सर्वे चैव चतुर्भुजाः ८ सुशुक्लमाल्यवसनाः सर्वाभरणभूषिताः जनाः प्रमुदिताः सर्वे परमानंदपूरिताः ९
तन्मध्ये सुमहद्दिव्यं विमानं सूर्यसंनिभं अत्यन्नतमहामेरुरूम्यकांतिमनोहरं १० बहुप्राकारसंपन्नं मणिमंडपराजितं १

भेरीमृदंगपणवमर्द्दलस्वनसंयुतं ११ नृत्यवादित्रसंपन्नं किंनरस्वरसंयुतं ददृशुस्तत्पुरुषं पूर्णचन्द्रमुखोज्वलं १२ चतुर्बाहुमु
दारांगं शंखचक्रगदाधरं पीतांबरधरं सौम्यं आसीनं परमासने १३ फणामणिमहस्कांतिविराजितकिरीटिनं भोगिभोगासुखा
१० सीनं सर्वाभरणभूषितं १४ आसनोपरि विन्यस्तवामेतरकरांबुजं प्रसार्य दक्षिणं पादं उत्थितं वामजानुनि १५ प्रसार्य वामहस्ता
ग्रं श्रीभूमिपरिसेवितं लीलया परया दिव्यां वैजयंत्या विराजितं १६ श्रीवत्सकौस्तुभोरस्कं वनमालाविभूषितं रूपास्सतरं
गोप्यं पर्णनेत्रांबुजं परं १७ शशिप्रभसमच्छत्रं चामरे व्यंजने शुभे हस्ताभ्यां धारयंतीभिः नारीभिस्सहितं मुदा १८ ददृशुस्ते १०
वानराः सर्वे विस्मिताः शुभलोचनाः नत्वांतरे महाभागः पुरुषः परमाद्भुतः १९ चतुर्भुजो रंउ हस्ता दृष्ट्वा हरिन[illegible]ः ।
दंउमुपस्थितान्सर्वान्कपीन्निर्भ्रहस्य [illegible]दा २० ते सर्वे वानरा भीतास्तस्मान्निर्जग्मुरंजसा निर्गत्य सहसा तेभ्यः प्राचुर्दृष्टं यथा यथा २१।
रावणोपि महामायी कामरूपी च वंचकः अन्यो वा रावणोपायं ज्ञो धनीयः प्रयत्नतः २२ इत्युक्त्वा वानराः सर्वे तेच संभ्रमसंभ्रमात्
यत्र पूर्वं महदृष्टं तत्र गच्छन्वनौकसः २३ नापश्यन्कंदरं तत्र चिह्नं वा दृष्टपूर्वकं भ्रमंतो स्वजने चोले विचिन्वन्तश्च सर्वतः २४
भ्रमद्रूपे वने निक्षिप्य तत्र सीमासन्वनौकसः ततः प्रभाते विमले रामो राजीवलोचनः २५ लक्ष्मणेन समं भ्रात्रा वानरेन्द्रेण धीमता
सहसैन्यैर्महातेजाः प्रतस्थे च जिगीषया २६ जित्वा च रावणं सर्वं प्राप्य सीतां महाबलः अयोध्यां पुनरभ्येत्य भ्रातृभिः सहितोऽनघः २७
प्राप्य राज्यं स्वयं रामो स्वामीतीर्थस्यैव भवात् इति श्रुतं मया पूर्वं स्रुवं भवता महं २८ मुनयपृच्छुः वैकुंठाख्या गुहा दृष्टा कपिभिर्वानरसत्तमैः ।
श्रुवलाभणितं सूत इति वेदांतपारग २९ किं तत्र वर्तते ब्रह्म श्रोतुं कौतूहलं हि नः सूत उवाच श्रूयतामभिधास्यामि देवमायामयाश्रुता ३०
वैकुंठाख्या गुहा सा तु दुर्ज्ञेया मुनिपुंगवैः दुर्ज्ञेया तु नरैर्देवैश्च मायया परमात्मनः ३१ लीलया विद्रुता पूर्वं वानराणां प्रकाशिता
तस्यां गुहायां ये दृष्टाः शंखचक्रगदाभृतः ३२ ते तु मुक्तास्तथा नित्यपरमानंदरूपिणः भुंजंतो ब्रह्मणानंदमाविर्भूतगुणास्तदा ३३
संचरंतः कामरूपाः लोकान्भागवताः सह आनंदरूपा किंकार्यं कुर्वंतो ब्रह्मणा हि ते ३४ वसंति तत्र सततं ब्रह्मणः परमेष्ठिनः

यदा यस्य कलिः कालो यस्मा जानन्ति गिरौ ३५ तदा गुहायां तस्यां तु विशेष्यं नीतिनं श्रुतं एवं प्रभावः शेषाद्रिर्वसत्यस्मिन् जग
न्मयः ३६ क्रीडते लीलया सक्तो नित्यं मुक्तो भवसरिभिः नीलमेघनिभं श्यामं नीलोत्पलसुलोचनं ३७ नीलाद्रिशिखरस्थं
तं भजामि त्रेवसुस्थितं गुहाख्यातं तु तं किं वायुमाभिर्गतकल्मषे ३८ शृण्वतामिदमाख्यानं कलिदोषमलापहं धन्यं
प्रशस्यमायुष्यं पुत्रपौत्राभिवर्द्धनं ३९ इतीरितो व्यंकटाद्रेः प्रभावः श्रुतो मया योगिवरेभ्य आदरात् समस्तजीवात्मसम
ष्टिरूपिणो हरेः प्रभावोपि करीन्द्रगोस्तुः ४० इति वराहपुराणे व्यंकटगिरिमाहात्म्ये दशमोध्यायः १० ॥ ७ ७ मुनय ऊचुः ॥
विश्वविश्रुतिविश्वार्थविभवो धविचक्षण। वक्तुमर्हसि तत्सूत यत्पृच्छामो वयं त्वयं १ व्यंकटाद्राविहानीलु सर्वप्रत्यक्षगोच
रः आस्ते स जनगोलाभः सर्वाभिष्टफलप्रदः २ कस्य वा पुण्यशीलस्य इदं रूपं प्रदर्शितं तत्कथ्यं तदशेषेण शृण्वतां नो
महामुने ३ इत्युक्तो मुनिभिस्तैस्तु सूतः प्राह मुनीन्प्रति सूत उवाच शृणुध्वं मुनयो यूयं व्यंकटेशकथामिमां ४ व्यास
न मुनिना प्रोक्तं मम पूर्वं स्वयंभुवः प्रदर्शितमिदं रूपमिति तत्कथयाम्यहं ५ इत्यंतमादितः कृत्वा श्रीनिवासस्य सत्कथा ।
पुरा कश्चित् ज्जाबालीकाश्यपो गौतमस्तथा ६ अगस्त्यो वामदेवश्च शतानंदो मुनिस्तथा योगिनः सनकाद्यास्तु वासवा
द्याश्चैवौकसः ७ हिरण्यकशिपोर्वंशसंभवैश्च सुरात्मभिः दैत्यैः प्रपीडिताः केचिद् दुःखं वै चातिनिर्वेदितं ८ निर्जरास्तु स
थ संभूय विचिंत्य विष्णुमव्ययं क्षीराब्धेरुत्तरं तीरं गत्वा देवं जनार्दनं ९ तुष्टुवुर्विविधैः स्तोत्रैरगस्त्याद्याः सुराश्च ते ।
क्षीरोदशायी श्रीविष्णुर्जगत्कारणकारकः १० सूक्ष्मप्रकृतिसंभूतो जीवतत्वैर्युतः प्रभुः सृष्टिकाले भवानेवात्वनोय
न्न हि दृश्यते ११ सृष्टा त्वमेव सर्वं च जगत्स्थावरजंगमं त्वमेव दृश्यते विष्णो जगद्रूपेण मास्तुते १२ अंगीकृत्य भवा
नेव जगत्पालनकर्मं च शेषे शेषे श्रियासार्द्धं निश्चिंतं मधुसूदन १३ प्रसीद भगवन्विष्णो प्रसीद त्वं सुरेश्वर प्रसीद क
रुणासिंधो प्रसीद करुणामला. १४ एतस्मिन्नंतरे कश्चित् घनश्च चक्रगदाधरः पार्षदप्रवरस्तस्य व्योम्नि चागत्य वै मुनीन् १५ ।

पुरुषः सोऽब्रवीद्देव श्रूयतामिति तान्मुनीन् पुरुष उवाच आस्ते भस्मो गिरौ कश्चिन्मायावी कमलापतिः १७ किमर्थमागतं स
द्भिर्युष्माभिः सनकादिभिः तत्रैव यूयं गच्छध्वं इति वोक्ता ययौ पुनः १८ निवर्त्य तरसा तस्माद्देशाद्देवमुनिसत्तमः संभूयते वि
चार्याथ किमर्थं कमलापतिः १९ मुक्त्वा क्षीराब्धिमध्यं च वसेद्भस्मो सनातनः इति संचिंत्य तरसा वैकुंठं लोकमुत्तमं ११
११ २० ययुस्ते मुनयः सर्वे योगिनास्त्रिदशा अपि गच्छंतो मार्गमध्ये तु ददृशुर्नारदं मुनिं २१ महतीं वादयन्वीणां भु
द्धस्फटिकसंनिभं कर्पूरधूलसदृशं भस्मोद्धूलितविग्रहं २२ वैकुंठलोकदत्यानंद ज्ञातं मुनयोऽब्रुवन् क्वा
स्ति नारद पुण्यात्मन्त्रैलोक्यं विदितं त्वया २३ न तवाविदितं किंचित्त्रिषु लोकेषु वि[illegible]ते क्व वा वसति लक्ष्मीशः शंस विद्वन्मह
मुने २४ श्रीशैलस्य समीपे तु दैत्याः केचिन यिनः बाधंते मनुजांस्त्रीबूंस्तापसान्योगिनो मुनीन् २५ रावणस्य गणा
नित्यं बाधते बलगर्विताः एतेषां विग्रहसक्तो विघ्नुरको महाबलः २६ तमेव शरणं यामः स तु कुत्र वसेदिति पृ
ष्टः प्राह मुनीन्क्रोपितांस्तु मुनीन्प्रति शृण्वच २७ पुरुषं तमहं द्रष्टुं दिव्यं कल्याणविग्रहं आगमं परमं धाम पर
मानंदकारणं २८ तदा कश्चिद्रक्षसमेत्य तत्र यामुक्तवानिदं भस्मो कापि गिरौ विष्णुर्लक्ष्म्या सह विनोदते २९ इति
श्रुत्वा वचः सेत्स्य गारगमिष्यामि तापसाः ब्रह्मलोकं गमिष्यामः सर्वे वयमतः परं ३० स एव वेत्ति सर्वं सर्वलोकपि
तामहः ते सर्वे नारदेनैव सह लोकपितामहं ३१ ययुस्ते प्रसुराः सर्वे मुनयो योगिनोऽपि च ब्रह्मलोकं समासाद्य ददृशु
रमितौजसं ३२ चतुर्मुखं चतुर्बाहुं ज्वलंतमिव पावकं वेदशास्त्राणि संभूय मूर्तिमंतमिव स्थितं ३३ गायत्र्या चैव सावित्र्या
सरस्वत्या च सेवितं किंनरोरगगंधर्वसिद्धसंघनिषेवितं ३४ सेवितं च दिशापालैरासीनं परमासने उपविश्य तु तद्दे
वः प्रेष्णे मुनयोऽपि च ३५ आसनप्रविष्टास्ते ब्रह्मणा मुनयोऽपि च पृष्टाश्च गमनं प्रश्नैरिदं वचनमब्रुवन् ३६ स्वामिन्
देवलपथा कुशलं च दुरत्यया सर्वमंगलमस्माकं सर्वलोकपितामह ३७ किं तु वामैधामहत्नो ब्रह्मरावणस्य दुरात्मनः

देवाः केचन संप्राप्ताः श्रीशैलस्य समीपतः ३८ अथ ते मनुजास्तोत्रं कर्मानुष्ठानतत्परान् तपोव्ययभयाः सर्वे सहन्ते मुनयो मलाः ३९
इतः परमशक्यं तत्सोढुं रावणचेष्टितं मायावी स च विज्ञश्च सर्वोपायविशारदः ४० एतेषां हनने शक्तः सर्वशक्तिधरश्च सः
न च पश्याम तं कुत्र कुत्रापि भुवनत्रये ४१ त्वमेव गतिरस्माकं तस्मात्पाहि भयापहात् इतीरितो योगिवरैश्च तापसैः बुधोत्तमैः श-
क्रपुरोगमैश्च व्याजहार देवं कमलासनोपि प्रोवाच देवान् मुनिपुंगवांश्च ४२ इति श्री वं० व्यंकटगि० एकादशोध्यायः ११ ब्रह्मोवाच (
अखिलीकृतं पुस्तं रावणेन सुरासुराः तेन वध्यश्च वध्यश्च मानुषेभ्यः कदाचन १ मानुषेभ्यो भयं तस्य निश्चितं न विचारणा
तस्योपायमहं वक्ष्ये विष्णुरेव परा गतिः २ स चेदानीं गिरावास्ते श्रीव्यंकटाभिधे स प्रार्थनीयः सर्वैश्च देवानां च निबर्हणे ३
अहमप्यागमिष्यामि गम्यतां तत्र माचिरं न शक्यमन्यैराप्तुं विचेतव्यमितस्ततः ४ मानवैः सरितश्चापि गिरिशाश्च सरांसि च
विचेतव्यं सदा सर्वेषु पापिभिश्च विशेषतः ५ तस्यास्ति तत्प्रियतमो भरद्वाजाख्य व्यंकटाभिधः मृगपक्षिशुकादीनां रूपं लब्ध्वा परास्तुरः ६
क्रीडते रमया सार्द्धं स गिरिनिस्तत्र पर्वते गिरिप्रदक्षिणे प्रीतिर्महती तस्य चक्रिणः ७ प्रदक्षिणविधानेन विचेतव्यः स तत्परः
इक्ष्वाकुवंशप्रभवो राजा दशरथो महान् ८ व्यंकटाद्रिं समागम्य पुत्रार्थं तप उत्तमं करिष्यति महाभागः स्वामिपुष्करिणीतटे ९
दर्शयति स्वरूपं स्वं तस्य राज्ञः श्रियःपतिः इक्ष्वाकवो महात्मानः सर्वे मुनयश्च दिवौकसः १० योगिनोपि महात्मानस्तस्माल्लोकामरास्तथा (
निर्गत्य सहसा शेषाद्रिवरं समाश्रिताः ११ नानाद्रुमलताकीर्णमनेकसरसंकुलं नालिकेरैस्तालपुन्नागाशोकशोभितं १२
कुंदमंदारपनसपूगकेतकसंयुतं तिलकैश्चिरबिल्वैश्च नमालैस्तमालकैः १३ मंदारचूतवरुणैराजवृक्षसमन्वितं
कोविदारकरंजश्च पाटलाश्च यपादपैः १४ उदुंबरजंबूभिः कपित्थकलिसूरहैः चंदनैः सिंदुवारैश्च शोभितं रक्तचंदनैः १५
भल्लातकदुरुमैर्दीर्घसंभवैः पादपैरपि खर्जुरैः किंशुकैश्चैव वचंदनैः पादपैस्तथा १६ कंकोलैर्मुचकुंदैश्च शिंशपाभूरुहैस्तथा
मधूकैः शाल्मलीभिश्च पुष्पितैरपि शोभितं १७ सर्वकालफलैर्वृक्षैः स्रवन्मधुसुशोभितैः पुंस्कोकिलसमुन्नादैः षट्पदस्वनसंभ्रमैः १८

पलायनं ताश्च भीतास्ते त्यक्त्वा शस्त्रायुधास्तथा त्यक्त्वा समरभूमिं च वनेलीनाश्चसानुषु ३५ नहि तत्र जनः कश्चिद्दृष्टश्च वनभूमिषु
गिरिदुर्गे च सर्वेषु वनदुर्गे च साधुषु ३६ महाबिलेषु कुंजेषु कंदरेषु गुहासु च मयमायासुरश्चगतस्यचानुचरास्तदा ३७
ददृशुर्नहि कंचिंश्च विनिर्गत्य च विस्मिताः ज्वालामुखायतः सर्वेप्रोचुरेवं पत्तिनः ३८ विस्मितः सोपि तां मायां ज्ञातः परमदुर्मदः
तद्देशवासिनः साधूनाहूयेदं वचो ब्रवीत् ३९ इमं देशं समुत्सृज्य गतव्यं देशमन्यतः क्षणमात्रमित्रप्रोक्तं जग्यामपरमधुनुः ४० ।
अस्त्रं च संदधे तस्मिन्नाग्नेयमत्रविचक्षणः प्रजज्वालच तद्दिव्यमस्त्रं परमभास्वरं ४१ कृशानुवत्तदस्त्राणि निपेतुश्च सहस्रशः ।
विचखुश्च भूतानि चलचक्रुः सुगुणास्तदा ४२ अंतर्धानं गतो यत्र चोरा तिष्ठंति वंचकाः गत्वा च तत्र ते चापि भस्मसात्कुरुतानरान् ४३
इति विक्षिप्य तद्दिव्यमस्त्रमाग्नेयमुत्तमं आक्रम्य रोदसी तच्च ज्वालामालासमाकुलं ४४ चोरदेशान्समासाद्य गिरिदेशांश्च नानिच ॥
च यत्र यत्रैव तिष्ठंति मायिनस्ते वनेचराः ४५ गृहंस्थानि च सर्वाणि स्थलान्यन्यानि एव च तेच सर्वे दुरात्मानो दग्धास्तत्तु महीरुहाः ४६ ॥

तेषां स्त्रियश्च बालाश्च सर्वे दग्धाश्च वह्निना बिलेभ्यः कंदरेभ्यश्च निष्कास्य तु क्षेत्रबंधवाः ४६ वनं नदीयं तत्सर्वं भस्मीभूतं च लक्षणात् । ४७ ।
निर्बीजं तत्कलं सर्वं दग्धमस्त्रस्य तेजसा ४८ भस्मीकृत्वा तु तान्सर्वान्प्रविवेश सुधीं ततः वृष्टिमानाययामास सघः सीतलकारिणीं ४९
आश्रावयं स तं देशं आजग्मुर्निर्गता जनाः निहतास्सर्वचोराश्च तेजसा भवतः प्रभो ५० इति विज्ञापितस्तेन बलाध्यक्षेण स प्रभुः
संतुष्टस्तत्र तं देशं आगत्य च सुदर्शनः ५१ तानि दुर्गाणि सर्वाणि स्थलीकृत्य वनानि च प्रकाशानि तदा चक्रे देशं प्रहतमार्गकं ५२
तत्र तान्स्थापयामास साधून्विप्रादिकानपि स्थापयित्वा तु तद्देशे धर्माध्यक्षं दयापरं ५३ वृष्टिं शाल्यादि दृष्ट्वा धिं च पोषयामास देशिकान्
इति श्रीमद्ब्रह्मपुराणे श्रीव्यंकटगिरि० त्रयोविंशतितमोऽध्यायः २३ सूत उवाच ॥ सुदर्शनमहाराजः कृत्वा देशमकंटकं ॥
तस्माद्देशादतिक्रम्य भागं दक्षिणमाययौ १ आगत्य दाक्षिणं देशं ससैन्यः सपरिच्छदः वादयामास वाद्यानि निःसालीप्रमुखानि च २
तेन शब्देन महता दारिता इव भूधराः मदमत्तगजेन्द्रैश्च सुंदरैः पर्वतोपमैः ३ अनीकैश्च वनं तत्र चूर्णितं च सहस्रधा ॥
विपिनानि प्रकाशानि कृतानि गिरयस्तथा ४ वनदुर्गाश्रिताः सर्वे सुग्रामीणैस्तदा कृताः तत्र दैत्याश्च संभृताः भराः भद्रकुक्षोभवाः ५
अंगवंगकालिंगाश्च विडालश्चोरकस्तथा एते भद्राः प्रधानाश्च पंचैते पंचपापिनः ६ बाधंते ब्राह्मणान्नित्यं क्षेत्रवित्तापहारकाः ।
योगनिष्ठांस्तपोनिष्ठान्यज्ञकर्मसु निष्ठितान् ८ पीडयंति च बालांश्च स्त्रियो वृद्धांश्च नित्यशः अग्निहोत्राणि वेदांश्च यज्ञांश्चैव सर्वमेव च ९
आचारा वैदिकास्तत्र प्रवर्तंते न च क्वचित् पीड्यमाना दुराचारैः पंचभिः प्राणिनां भृशं १० क्रूरास्तु बहवः संति प्राणिपीडाकरा अपि
ते सर्वे सहसा तत्र विचार्यं च पुनः पुनः ११ सुदर्शनं च राजानं ज्ञात्वा तत्र समागतं सर्वैः संभूय योद्धव्यं नान्यथा गतिरस्ति नः १२
राजा सुदर्शनो नाम सहस्रभुजमंडितः विक्रमेऽपि च राजा तु सहस्रकिरणोपमः १३ यत्र यत्र स वै राजा कुद्धः पश्यति सत्वर ॥
तत्र सर्वं च सहसा दग्धा किल भविष्यसि १४ अतः सर्वे वयं वीराः सावधानाश्च ते सदा योऽस्यामन्यानिनिर्भित्य तेजः संहरपदस्य च १५ ॥

परिघान्पट्टिशान्प्रासांश्चक्रशूलपरश्वधान् चापानि च सबाणानि खड्गांश्च पृथुलान्प्रभून् १६ प्रतिगृह्य परं युद्धाय रक्तांबरसमावृताः ।
विचित्रवाससः सर्वे विचित्राः शस्त्रपाणयः १७ निर्ययुर्मदमत्ताश्च चलंत इव पर्वताः तेषु युद्धकुशलाश्च सेनानीः शस्त्रपाणयः १८
२२ अन्ये लक्षणसंयुक्ता वरचर्मासिपाणयः अहमेव वधिष्यामि सर्वानिति बलोद्धताः १९ इति सर्वे समाजग्मुर्युद्धार्थमथ चोदिताः ।
सुदर्शनोपि नान्दृष्ट्वा क्रुद्धो नाग इव श्वसन् २० स्फुलिंगाक्षं बलाध्यक्षं ज्वालाकेशं महाहसं कालांतकं रणप्रांचं सर्वान्संतुष्टमानसान् २१ २३
स सैन्यान्प्रेषयामास चौराणां निग्रहे तदा निर्ययुस्ते रथैः शीघ्रैर्नागानीकैस्तु संवृताः २२ परिघान्पट्टिशांश्चैव शूलखड्गपरश्वधान् ।
गृहीत्वा विविधान्युद्धे रश्मिज्वलितकुंडलाः २३ चिक्षिपुर्दुष्टचोरेषु शालूण्यानाहरिषु ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परश्वधैः २४
अन्योन्यं समरे जघ्नुः शूराः सैन्ये प्रयोधकाः एवं प्रवृत्ते संग्रामे निहतं सुमहद्बलं २५ दुष्टानां देवराजानां शातं शोणितनिश्रवैः
रथमातंगकुलाश्च हयसन्नाश्च जद्रुमाः २६ शरीरसंघानवहास्तु रक्तपूरस्तु निम्नगाः स्फुलिंगाक्षो बलाध्यक्षः शरैरेकं जघान सः २७
एकं जघान समरे ज्वालाकेशः शितैः शरैः महाहसः पुलिंदं च जघान समरे शरैः २८ कालांतकाविशालं च कालकूटं रणहायुधि
जघान समरे तीक्ष्णैः शरैराशीविषोपमैः २९ ततः सुदर्शनो राजा हयशीर्षं सुदारुणं श्वेतच्छानं गतोयत्र तिष्ठति गिरिसानुषु ३०
प्राणिपीडाकरा ये तु ये तु दस्यांशसंभवाः यत्र कुत्र च तिष्ठंति तांजहाति महाचार ३१ संधाय धनुषि क्षिप्रं विससर्ज महाप्रभुः ।
तस्यासुनिर्गमध्यानेऽप्यग्रे सैन्यं सुरासनं ३२ देवान्भग्नाननुक्रान्त्वानुद्रुसमागतान् द्विधा चकार समरे हयशीर्षं महाद्युतिं ३३
वनेषु गिरिदुर्गेषु ग्रामेवावर्तनेपि च यत्र यत्र दुरात्मानो ते सर्वे च द्विधा धृताः ३४ न ज्ञाता याश्च शिशवस्तेषां दाराश्च बालिकाः ।
द्विधा जाताश्च ते सर्वे चित्रमस्त्रेण तेजसा ३५ तत्र सर्वे देवताः सर्वे देशीयाश्च जना अपि विस्मयं परमं जग्मुः किमिदं चालितं जनाः ३६
छिन्नं भिन्नं शरीरं दग्धं च भग्नं शस्त्रपीडितं बलं सर्वं तु दुष्टानां दस्युरिणां रणे मृषु ३७ देशाघातकदुष्टेषु तत्किं चिह्नानि तत्र वा

जलदुर्गं गिरोदुर्गं वनदुर्गं तथैव च ३८ स्थलदुर्गं च यद्यान्यं निवासं दुष्टदेहिनां तत्तत्सर्वं महाराजा हत्वा निरस्तकंटकं ३९
हत्वा प्रकाशतं देशं हत्वा प्रहतमार्गकं मार्गामार्गं च सर्वत्र हत्वा निहतकंटकं ४० विप्रक्षत्रादिकान्सोथ नत्वान्यान्द्विजानन्वहून् ।
स्वे स्वे धर्मे नियुज्यैव स्थापयामास वै सुखं ४१ निरोगाश्च जनाः सर्वे कामक्रोधपरांमुखाः वेदशास्त्रपराः सर्वे सर्वे यशसु निष्ठिताः ४२
काले वर्षति मेघाश्च फलान्निच महीरुहाः समृद्धसर्वसस्यानि संतुनः शासनात्तव ४३ अनुग्रहाच्च तान्सर्वा नितितद्देशवासिनः
जजलेव्यं करार्धीशाकरपल्लवभानुमान् ४४ ततो देवाः समागत्य स्तुत्वा देवं हरिं प्रभुं ववर्षुः पुष्पवर्षाणि गंधर्वाश्च जगुः किल ४५
इदानीमत्र वसतां लब्धं प्रात्स्यपुनरुत्तमं प्रसादाद्भवतः सोयं संतो देशस्तथ प्रभुः ४६ इदानीं पश्चिमे भागे किंचित्कार्यं भविष्यति ।
इति विज्ञाप्य ते सर्वे दिवं जग्मुर्यथागतं ४७ इति श्रीमद्द्वारपुराणे व्यंकटगिरिमाहा० चतुर्विंशोध्यायः २४ सूत उवाच
राजा सुदर्शनः श्रीमान्प्रतापहतकंटकः दैवेन शिशिमासाद्य हत्वा निर्बाधमेव च १ देशस्य रक्षणार्थं च कंचिन्नृपवरं तदा धर्मा
त्मानं प्रतिष्ठाप्य प्रययौ पश्चिमां दिशां २ शतं शतसहस्राणि भेरीणां निनदुस्तदा पताकिनो रथास्तत्र ध्वजयुक्ताश्च वाजिनः ३
मत्तेभाः कलभाश्चैव तथा गंभीरनिस्वनाः शस्त्रवर्मायुधोपेता शालधायुद्धकारणात् ४ पोताश्च द्वीपसंभूता वायुवेगास्तथा परे
सर्वोस्त्रशस्त्रसंभिन्ना निर्ययुश्च सहस्रशः ५ शतानां च सहस्राणां च सहस्राश्चायुतास्तथा सर्वायुधैश्च संपूर्णा पताकालंकृतास्तथा ६
विमानानि च सिद्धानां शतशोथ सहस्रशः स्यंदनानि विचित्राणि निर्ययुर्भास्वराणि च ७ उद्यतायुधनिस्त्रिंशान तथोद्यतवरायुधाः
उद्यतासिगदाशूलाः तथोद्यतकरायुधाः ८ अट्टहासाग्निमुंचंतो निर्ययुश्च पदातिनः मध्यगश्च करा जासो सहस्रभुजमंडितः ९
निदाघप्रतप्तसूर्यैः सहस्रांशुरिवाबभौ गत्वा पश्चिमदिग्भागं व्यंकटाद्रेरदूरतः १० कानने पर्वताकीर्णे सिंहव्याघ्रनिषेविते
मातंगैर्नरमानैश्च वराहमहिषैस्तथा ११ वृकभल्लूकसंवृत्ते तस्मिन्नहनिकानने दैत्यांशः कश्चिदुत्पन्नः किरातः पर्वतोपमः १२

नाम्नाचवनकर्त्ताचरिपुघ्नश्चसुतोबली शत्रुघ्नांशसमुद्भूतप्रजातश्चर्यापरोभवत् १३ यक्षराक्षससिद्धानांमनुष्याणांमहात्मनां
२४ दुर्जयस्त्वमसौविष्णुसाहसीलुब्धकदाचन १४ कलुध्वंसकरंरुध्वाध्याताचधृतिमान्नरः खड्गमादायचिच्छेदसशिरःपुष्पसंभृतं १५ २४
अल्लंछलेनचगंधाघेरर्चयंतश्शिवायतत् प्रसन्नस्तत्क्षणाद्रुद्रोजीवयित्वाचतंपुनः १६ ददौचतदभिप्रेतंलब्ध्वाचवरमुत्तमं
वनकर्त्तासमागत्यवनेतस्मिन्नुरासदं १७ वनंदुर्गपराभेद्यमग्विधायमहाबलः अनेकशालसाहस्रैरनीकैःपरिधारितः १८
लोकाननुत्साद्यामासवरदानमदोद्धतः तुष्टुवुःपीडिताःसर्वेविघ्नाघाःप्राणिनस्तदा १९ सतुज्ञात्वादुरात्मानंसुदर्शनमहानृपं
नृपइत्येवलंमत्वाभिर्जगामरणायसः २० एकाममक्षौहिणींसेनांगृहीत्वाभिर्जगामसः सचद्धंककचीखङ्गीचापीपरबलार्दनः २१
रथमारुह्यसज्जंचसर्वशस्त्रास्त्रभूषितं यायौचतस्यपुरलस्तुरंगाश्चमहागजाः २२ पदातयस्संसरथायपुःशस्त्रास्त्रपाणयः
आवर्त्ततमहद्युद्धंसेनयोरुभयोरपि २३ शरैश्चरत्नैःसितैर्बाणैर्भिंडिपालैःपरस्वधैः कुंततोमरचक्रैश्चपरैर्वापट्टिशैःस्थितैः २४
शक्तितोमरभल्लैश्चगजाश्वर्मासिसाधनैः अन्योन्यंकदनंचक्रेदेवदानवयोरिव २५ शतघ्नीपट्टिशैश्चित्रैरन्यैश्चसाधनैः
सुदर्शनभटाश्चापिनिर्जघ्नुस्तान्किरातजान् २६ विविधायुधहस्ताश्चशूलमुद्गरपाणयः गदाभिःपट्टिशैर्भिंडेरसितैमुसलैर्भृशं २७
परिघैर्भिंडिपालैश्चभल्लैःप्रासैःपरस्वधैः रथैःकवचिनेस्त्वश्वैर्ध्वजैश्चसमलंकृतैः २८ हिरण्यजालविहितैःखरैश्चविविधायनैः
हयैःपरमशीघ्रैश्चगजेन्द्रैश्चमहोत्कटैः २९ नेगरदामिश्रश्चनीमाभिःपट्टिशैःकुटमुद्गरैः घोरैश्चपरिघैश्चित्रैस्त्रिशूलैरपिशासितैः ३०
विदार्यमाणास्तेभटानिपेतुर्भुविसंयुगे अमर्षोज्जनितोदुर्षोश्चकुःकर्माण्यशीलवत् ३१ शरैर्निर्भिन्नगात्रास्तेशूलनिर्भिन्नदेहिनः
ननंदुर्दुष्टचोराश्चनामानिवचभाषिरे ३२ तद्भूतवान्तुलंघोरंयुद्धंसैन्यद्वयस्यच ववृषुरुधिरंकेचिन्मुखैस्तेवनवासिनः ३३
पार्श्वेषुदारिताःकेचिद्धस्तेषुदारिताःपरे पट्टिशैश्चूर्णिताःकेचिन्मुसलैःकेचिद्विदारिताः ३४ ध्वजैर्निपातितैर्नागैःखरैश्चविनिपातितैः ।

रथैर्विमर्दिताः केचिन्मथिताः कानने स्थिताः ३५ मुद्गरैराहताः केचित्पतिता धरणीतले परिघैर्मथिताः केचिद्भिंडिपालैर्विदारिताः ३६
केचिद्विनिहताः भ्रमोरुधिराद्रीवनौकसः केचिद्विद्रावितं सैन्यं वनकर्त्तांविलोक्यतां ३७ बभूव क्रोधताम्राक्षः सेनाध्यक्षमुवाच ह
ज्वालापहं मोहाश्वरं जहि हंसं गच्छ शीघ्रतः ३८ इत्याज्ञप्तस्ततस्तूर्णं ज्वालापादः प्रतापवान् धनुर्विस्फारयामास रथस्थः कनकांगदः ३९
सुदर्शनो महाराजः सेनाध्यक्षं विलोक्य तं वद्दंवामुखनामानं लब्ध्वांवान् लविक्रमं ४० जहि हंसमरे गच्छ त्वं नसैन्यमशेषतः
इत्यब्रवीत्स तु सोऽपि निर्गतः सरथस्तदा ४१ शार्ङ्गमादाय सुमहद्ध्यानां वाजिनं तथा गजानामेकघंटां च एकेन शतपत्रिणा ४२
जघान च महातेजाः कालांतकयमोपमः अलभवापावकयदं मौर्वीघ्रमलिः ह्रणात् ४३ तद्दैन्यं वरं च क्रमस्ससा हूतवानरः
एकाक्षौहिणीसेनां सुदर्शनबलाग्रणीः ४४ नोपयेयमस्लोकं च मुहूर्तद्वयमाचलः निःशेषं स्वबलं सर्वं हतमालोक्य वेगतः ४५
दिव्यमंत्रं च संधाय तिष्ठ तिष्ठेति चाब्रवीत् आजगाम रथी शीघ्रं किरातो लघुविक्रमः ४६ सुदर्शनं महाकोपः स जातो बद्धवानरुः
विष्णुचक्रेण तं घोरं जघान वनगोचरं ४७ शतं सहस्रमयुतं नराणां वाधतेनलः बाणैकेन सहस्राणि निर्जघान महारथं ४८
हते किरातराजे तु तद्बलं निर्मलं बभौ ४९॥ इति श्रीमद्ब्रह्मपुराणे व्यंकटगिरिमाहा॰ पंचविंशोऽध्यायः २५ सूत उवाच
चक्रारसहसा रामो सुदर्शनपराधतः तद्देशाहतदुष्टं च हतापथ्यहकंटकं १ ह्यासर्वाणि दुर्गाणि गिरिस्थस्तु वनानि च
विनिहत्यगजैरश्वैर्विनिहत्य महापथि २ स ह्याच्छातत्रमनुज्ञास्थापथ्यापथासुखं तद्देशारक्षकं कंचिद्धर्मिष्ठं सत्यवादिनं ३
निविश्य देशमध्ये च जनानामत्र सत्वरं प्रतस्थे स ह रस्त्रसाद्यष्टचार जिगीषया ४ ततश्चोत्तरदिग्भागे सहस्रकिरणोपथा
नीहारपोषणार्थाय तद्वक्रतसहस्रकः ५ प्रतापविक्रमादित्यः सुदर्शनमहामनुः श्रीव्यंकटनगाधीशाद्दिव्याज्ञापरिपालकः ६
पदातयो गजाश्चाश्वरथाश्च गिरिसंनिभाः ययुरग्रेच बाधाग्निवाद्यं तच्च सर्वतः ७ ततः प्रचोदितास्तेन येऽर्कंद्रपांडुरक्षकराः

हेमकोणहताभेर्योबल्लानांचायुतस्तदा ८ चिनेदुश्चमहाघोषाः शंखाः शतसहस्रशः तम्डिन्नास्वरकल्माश्चखड्गाः पाशाश्चपट्टिशाः ९
वेणुस्तस्मिन्महासैन्येनीलमेघेषुभूरिशः उत्तरेव्यंकटाद्रेस्तुभागेतस्मिन्महासुरः १० भेरुंडोनामदैत्यानांप्रबलोबलदर्पितः
२८ ब्रह्मणाच्चपुरादत्तवरः पर्वतसन्निभः ११ सतुतत्रनिवासंचलेभेचाचबहुभिर्वृतः व्यंकटाद्रौतदासर्वे गिरौवाकाननेपिच १२
तपांसिकुर्वतोविघ्नंकुर्वन्प्राणिभयंकरः ग्रामेवापत्तनेवापिस्थितान्विप्रादिमानुषान् १३ बाधंतेसततंतीक्ष्णांतेनदैत्याःप्रपीडिताः २८
कांभोजायवनाश्चैवम्लेच्छासंकरकारकाः १४ भेरुंडस्यबलादंतेनादैत्याःप्राणिपीडिताः तेसर्वेपापकर्माणःसंश्रयमुस्तत्तायुधाः १५
भेरुंडमगमलःऌच्चासरथाश्चगजास्तथा युद्धार्थमागतंश्रुत्वाराजानंचसुदर्शनं १६ युद्धायनिर्ययुःसर्वेगदाशक्तिपरश्वधान् ४
केचिद्धर्मायुधधराःकेचित्तोमरपाणिकाः केचिच्छूलहस्ताश्चशरचापधराअपि १८ + गृहीत्वांकुशपाशांश्चखड्गांश्चकेनकस्यनान् + १७
अट्टहासंविमुंचंतोननृतुःसममहाबलाः वाद्यघोषंचमहतोकारयंतिचकेचन १९ सन्नद्धाश्चैवमागत्यचक्रुस्तेकदनंमहत्
निहतास्तेतुशूरैश्चकिरातैरसुरैरितैः २० निकृंतशिरसःकेचिच्छिन्नपादास्तथापरे केचित्कृंतशिरस्त्राणाःकेचिच्छिन्नोरुबाहवः २१
केचिच्छिन्नतनुत्राणाःकेचिच्छिन्नोरुबाहवः एवंहतबलंसर्वंमसुरेणदुरात्मना २२ तद्दृष्ट्वानिहतंसैन्यंसुदर्शनमहाप्रभुः
क्रोधेनारुणताम्राक्षःप्रजज्वालइवानलः २३ छेदैतस्मिन्नभःसर्वंबभूवकलुषंजगत् चक्रस्यैतिदाकानोबभूवतुनकेचन २४
नक्षत्राणिनभोग्निस्मपतंत्युल्काःसहस्रशः अत्यंतंवातिपवनःसहशल्यःप्रभंजनः २५ चकंपेवसुधातस्तापेतुःशैलाश्चपादपाः
चुक्षुभुःसागराःसर्वेनिंदुर्भूताद्दिवौकसः २६ युद्धार्थमागतादैत्याःकिराताःपुल्कसास्तथा कश्मलोपहताःसर्वेविषण्णावदनास्तथा २७
तस्यकोपात्समाजातःपुरुषःपरमाद्भुतः चापीडशीर्षीशिरस्त्राणीकविक्लेनकपिंगलः २८ नाम्नापावकसंकाशःसाक्षात्पावकविक्रमः ।
सतमाज्ञापयद्राजाजहिदैत्यानितीश्वरः २९ पावकःसर्वशस्त्रास्त्रसंपन्नःसमरेबभौ प्रलयाग्निरिवादित्यसहस्रसदृशप्रभः ३०

मुमोच बाणवर्षाणि परसैन्येषु पावकः विनोदं कारयामास कंचिद्विस्मयकारकं ३१ संमोहनाख्यं दैत्यानां गांधर्वं समयोजयत्
मोहितास्ते परमास्त्रेण सक्रोधसवरायुधाः ३२ परसैन्यं च तत्सर्वं महास्वजनसार्थकं नायुध्यंत न हत्योधा ह्रष्टा सेनापतिं तदा ३३
नाग्नेयोपावकसंकाशं जनकं स्वकुलोद्भवं महासर्वजनमस्यं निपातितावसुधातले ३४ तद्दृष्ट्वा देवगंधर्वाः सिद्धविद्याधरादयः
विस्मयं परमं जग्मुः साधुसाध्विति चाब्रुवन् ३५ नारदःपावकस्यो मोहितानां प्रपायनं अयुक्तामिति संदिश्य मुपसंहृत वांस्तदा ३६
विमुक्तमोहास्ते सर्वे गृहीत्वा शस्त्रपाणिकान् चक्रुर्लोकदनं घोरं असिभिःपट्टिशायुधैः ३७ क्रौंचमस्त्रं समादाय परेषां युद्धकांक्षिणां
छेदितुं कर्णनासे च शलिमं अजनापहं ३८ तद्गणात् छिन्ननासाश्च कर्णाश्च संयुगाबुच विलोक्यते हि तत्कर्म कुट्टाजसमुश्चतसुरः ३९
पुनः पावकसंकाशः सर्वास्त्रकुशलो युधि भिंडिपालेन सर्वेषां बाहूंश्चिच्छेद सर्वतः ४० सर्वतश्छिन्नहस्ताश्च परावादितुमुद्यताः
तद्दृष्ट्वा तु पैशाच्यमस्त्रं मंत्रेण मंत्रितं ४१ विससर्ज अपितं घोरं सर्वविस्मयकारकं यस्मात्पिशाचभूतैश्च म्लेंछादेस्यादयस्तथा ४२
अन्योन्यं स्वादयंतस्तु प्रयुर्विलयमंजसा स्वसैन्यमिरतं दृष्ट्वा निःशेषयुद्धभूमिषु ४३ नैरंत्रस्तु ततः स्वयोभ्रलं परमदारुणं
गृहीत्वा पावकश्चास्त्रं अग्निकुंडाक्ससंयुगे ४४ योजनाग्निं प्रयुक्तेषु कंपयन्मेदिनीं तदा वायव्यमस्त्रमादाय पावकाग्निसमप्रभुः ४५
भ्रामयामास धात्रेव तृणं पर्वतसन्निभं प्रदक्षिणं कारयित्वा व्यंकेदाद्रिं च दानवं ४६ पुनरक्षिप्यतं दैत्यं आकाशे दशयोजनं
पातयामास भूमौ तु वायव्यापरमाद्भुतं ४७ जीर्णकूष्मांडवद्भूमौ विशीर्णः पर्वतोपमः एवं निहत्य तं दैत्यं हत्वादेशाककंटकं ४८
वनदुर्गाणि सर्वाणि स्थलीकृत्य तदाजनान् ससुरं स्थापयामास व्यंकटाद्रौ सुदर्शनः ४९ आकाशे देवगंधर्वाः पुष्पवृष्टिं प्रकीर्यच ।
साधु साध्विति नंदेवाः अस्तुवं स्तुतिभिस्तदा ५० स्वामिंजनपदः सर्वः लेभे स्वस्थ च या प्रभो गच्छन्व्यंकटाधीशसमीपं कुरुनंदन ५१

इत्युक्त्वा च ययुः सर्वे ऋषिदेवासुरान्विताः स्वसैन्येषु हतायेतु जीवमापुश्च ता स्मुनः ५२ स्वस्थं चकार तं देशं व्यंकटेशाज्ञया तदा
काले वर्षति पर्जन्यः अफलांस्तेन च पादपाः ५३ सर्वसस्यानि देशेषु फलंति सुतरां तदा निरोगाश्च जनाः सर्वे दुष्टबाधा न च क्वचित् ५४
२६ वैकुंठे यमथान्यो वा स्वर्गो भूमिरतः क्षेमु इति तन्मानिरे सर्वे देशेन व्यंकटाधिपे ५५ वांछंति जन्म तत्रैव देवाश्चपि दिवौकसः ५ २६
सुदर्शनो महाराजा सहस्रभुजमंडितः ५६ आज्ञां व्यंकटनाथस्य कृत्वा सम्यक्प्रतापवान् जयमंगलघोषैश्च वृष्टिभिः कुसुमोत्करैः ५७
सर्वसैन्यैः समायोपेतः सर्वाभरणभूषितः प्रविवेश विमानं तं व्यंकटेशस्य निर्मलं ५८ इतिश्रीवराहपुराणेव्यंषड्विंशोध्यायः २६
सूतउवाच। मुनयः श्रुतमाख्यानं किमुचत्रुछलाश्रयं · वक्तुमर्हथ पृष्टं हि किंतु नः श्रोतुमिच्छथ १ ऋषय ऊचुः
पिबतां व्यंकटेशस्य कथां दिव्यरसायनं अस्ति तृप्तिर्न कस्यापि भयस्तु शौचवर्तते २ कलौ कलौ यथा तिष्ठे व्यंकटाद्रिशिरोमणिः
प्रजयिष्यंति के वापि वरदानं च कीदृशं ३ वक्तुमर्हसि तत्सर्वं त्वयवृत्तान्तमसामेत इति पृष्टो ब्रवीत्सूतः कथां श्रीव्यंकटेशितुः ४ सूतउवाच।
कलौ सर्वापि कलौ चैवं व्यंकटेशो विवर्तते ततः परं मिथ्याल्पेदान्मौनं तं चैवाचस्थितिः ५ अर्चावतारे भवति नराणां चर्मचक्षुषां वैकुंठा
दागतं दिव्यं विमानं तु तिरोहितं ६ विमानमात्रं तु कलौ कारयिष्यंति मानवाः पुण्यशीला महात्मानः कदाचिद्धेत्रसमृताः ७
कदाचिद्ब्राह्मणाः पुण्याः कदाचिद्बल्लवा नराः अर्चयिष्यंति सेवां वरिष्यंति च मोहिताः ८ तथैव च मतिं केचित्करिष्यंति कलौ युगे
साक्षात्स्वरूपं हित्वा सर्वेषां पश्यन्निव वर्तते स्थले ९ कलौ कलौ तु विमाने स्यात् दिव्यसाख्यामात्रमेव च किंतु दर्शनमात्रेण पापकोटीर्व्यपोहति १०
कश्चित्सज्जां च महती कदाचित्स्वल्पमेव च स्वयं हि व्यंकटाधीशः सकाशं यास्ति वैकुंठे चिरं ११ अप्रकाशं कदाचिच्च व्यंकटाद्रिशिरोमणिः
एवं हि रमया सार्द्धं क्रीडं सेव हितत्रये १२ कलौ युगे निवेचित्रं दर्शयिष्यति केशवः अस्य दाने न वेल्ल त्स्या स्वस्त्याश्च जायापि च १३

भविष्यति प्रसन्नश्च स्मृतिमात्रेण केशवः मार्गेणागमनस्यैव व्यंकटाद्रिर्गिरिं प्रति १४ प्रसन्नो भवति क्षिप्रं दास्यतीष्टं च तुष्टहृत्
स्वयमप्राकृतो विष्णुश्चरिष्यत्यप्राकृतं यथा १५ करिष्यति तथा देवो मोहयिष्यति लाज्ञानान् मानुषांश्चैव भोगांश्च भोक्ष्यंति प्रीतमानसाः १६
उत्सवांश्च विविधांस्तस्य कारयिष्यंति मानवाः आगमिष्यंति देवाश्च सेवार्थं वै कलौ युगे १७ स्नास्यंति च सरसाध्वीका करिष्यंति च ओदनं
निवेदितं च ते देवा मनुष्याणामगोचराः १८ विमानं तद्दिपश्यंति देवास्ते पूजयिंति च कथयिष्यंति देवाश्च माहात्म्यं मानराऽति १९
तेषां हि व्यंकटाधीशः क्षिप्रं दास्यति चेप्सितं स्वल्पधर्मेण संतुष्टः पुत्रं क्षेत्रं कलत्रकं २० आरोग्यं भूमिमैश्वर्यं राज्यप्राप्तिं च सत्वरं
आयुश्च दुर्लभं नृणां स्वर्गलोकाधिकाःनपि २१ जन्मकोटिसहस्रैश्चापि कलेः पुण्यैर्दुरासदं नित्यस्थिति च देवोसौ दास्यत्याचार्यसंश्रयात् २२
अहोयं व्यंकटाधीशः धर्मश्चित्रं व्यंकटभूधरे आचार्यमाश्चर्यमिति स्तुवंतो वैमानिकास्तत्र मरुत्सनाथाः २३ यथागमिष्यंति तथा भयाच्च
गीतं भविष्यद्भवतां पुरस्तात् २३ कलौ युगे तु संप्राप्ते विशेषाद्व्यंकटाचले प्रख्याताद्यधिकाभक्ता भविष्यंति तपोधनाः २४
सान्निध्यमाद्यं व्यंकटे तत्र करिष्यति रमापतिः म्लेच्छसंकरजातीनां अथ पापात्मयोषितां २५ किरातपतितादीनां अज्ञानां हीनजन्मनां
भक्तिः श्रीव्यंकटाधीशे अधिकं च भविष्यति २६ तेषामेव रमाधीशः श्रीप्रदास्य समीप्सितं सान्निध्यं तत्र कुरुते भक्त्याधीनो पतो हरिः २७
आयोनु रूष्कमालव्या गौडा वंगा कलिंगकाः आंध्राः कर्णाटदेशीयाः कोशलाः कूलमानुषाः २८ चोलाश्चोराश्च पांचाला नानादेशेषु संभवाः ।
द्वीपांतरगताश्चापि व्यंकटेशमहोत्सवे २९ धारयंतो महाभक्त्या आगमिष्यंति कोटिशः सर्वलक्ष्मावरं चेष्टं भविष्यंति मुदान्विताः ३०
जप्राकृतः स्वर्णताम्ररूप्यैर्व्यंकटाचलेशः प्राकृताचलवद्भोगं भविष्यति कलौ युगे ३१ मतांतरप्रविष्टानामपि भक्तिर्विशेष्यते
सर्वात्मिके रमाधीशे व्यंकटेशे परात्मनि ३२ एवं कलौ परां भक्तिं भविष्यंति च पावनीः भक्तिमंतं पुरा दृष्ट्वा अन्ये त्यक्त्वा भजंति केशवं ३३
वृष्टिप्रदे व्यंकटेशे दृष्ट्वा योभजते परः सोपि दृष्टं परं लब्ध्वा परामपि शांतिमवेत् ३४ चित्रं युगं कलेश्चैव श्रीशः कीर्तते व्यंकटाचले
अतएव कलिः साधुः साधवः श्रद्धयान्विताः ३५ विशेषाद्व्यंकटाधीशे विशेषः साधुरेव हि इत्येवं मुनयो वापि कथयिष्यंति कलौ युगे ३६

कलौदोषपरीतानांनराणांपापकर्मणां व्यंकटेशात्परोदेवोनास्त्यन्यःशरणंभुवि ३७ व्यंकटेशसमोदेवोनास्तिनास्तिमही
तले स्वामिपुष्करिणीतीर्थसमंनास्तिनचास्तिहि ३८ द्रव्यार्जनपरोनित्यंभविष्यंतिकलौयुगे अनुग्रहोपिलोकानांकामेःश्शोपिसर्वदा

३९ यस्त्वयंतत्रयास्त्यंशान्तयंममसंप्रति तवाभिष्टंमहादास्याद्दास्यत्येवेतिचाब्रुवन् ४० इतिसर्वजनेःसाक्षीकृत्खलुभविष्यति
कलौतदीयचारित्रंवक्तुंकल्पशतैरपि ४१ आपादकामुकंलेशेनचारित्र्यंतस्यमंगलं ॥ इतिश्रीमद्गरुडपुराणेव्यंकट०सप्तविंशति
मोध्यायः २७ ७ मुमुक्षुरुवाच ॥ भगवन्सर्वशास्त्रज्ञवेदवेदांगपारग आचार्यसंश्रयादेवलभतेहपरांगतिं १
अहोहिवैष्णवोधर्मःइतिचोक्तंत्वयापुरा अतस्त्वयावतत्सर्ववक्तव्यंतपोधन २ सूतउ० अथतामभिधास्यामिसंग्रहेनतपोधनाः
उत्यर्थंमुनिपातालाख्यकराक्यतथरे ३ सितेनश्वराहेणधरित्र्येभाषितंपुरा पृच्छतिवैष्णवाधर्मानंतस्तवैपुरास्वलं ४
व्यासप्रसादाद्धर्मास्त्वान्वेधितत्राहमंजसा संग्रहेणप्रवक्ष्यामिगोप्याद्गोप्यतरंतुतत् ५ तेषांवैष्णवधर्माणांविश्वासस्तुपरांगतिः
यावानपिचविश्वासस्तावतीसिद्धिरीरिता ६ गुरुरेवपराधर्मोगुरुदेवपरागतिः पापक्षयप्रतिक्षिप्तगुरुरेवात्मभावतः
तस्मात्सर्वप्रयत्नेनविश्वस्यत्परमगुरुं नेत्पापंतद्गुरुर्हंतितत्पापंतद्गुरुस्तथा ८ पारंपर्यंक्रमाद्विष्णुःसर्वपापप्रणोगुरुः
कारुण्यमूर्तिःश्रीविष्णुःगुरुःपापंचपापिनः ९ शास्त्रहस्तेनसंसारमग्नमुद्धरतेहरिः न्यायविद्याख्ययोगीचधर्माधर्मविवेकवान् १०
तपोनिष्ठब्रह्मनिष्ठःतपस्वाध्यायतत्परः निरुधोनिर्ममश्शान्तोदान्तोमितवत्सरः ११ गुरुरित्युच्यतेयस्तुपरार्थैकप्रयोजनः
भीतःसंसारदावेभ्यःशांतोदांतःशुचिर्बुधः १२ अतःपरमनिर्विष्टोनिर्वैरःसर्वजंतुषु समाश्रयेद्गुरुंभक्त्यामहाविश्वासपूर्वकं १३
निक्षिपेत्सर्वभारांश्चगुरोश्रीपादपंकजे नित्यनैमित्यकंसर्वंयथाशक्तिसमाचरेत् १४ मोक्षार्थीनिरहंतिष्टन्मंत्रान्तरविवर्जितः
स्नानान्तरविहीनस्यध्येयानुष्ठानतत्परः १५ अष्टाक्षरात्परोमंत्रोनास्तिनारायणात्परः नास्तिन्यासात्परोयोगइतीतिचप्रभाषितिः १६

एवंहिवर्तमानस्यदेहांतेपरमंपदं ॥ न्यासविद्यापरैरेवंवर्ततेपरमार्थवान् १७ ध्याननीभूबलधीःशांतोवैराग्यपरमाश्रितं
अहंकारविहीनश्चयतवाकायमानसः अहंकारविहीनश्चविविक्तस्थलमाश्रितः बलदर्पविहीनश्चकामक्रोधविवर्जितः १९
शांतश्चनिर्ममश्चपरिग्रहविवर्जितः कल्पतेब्रह्मभूयायब्रह्मज्ञानस्यवैभवात् २० ब्रह्मभूतेभवेत्पश्चात्प्रसन्नात्मानसंशयं
तस्यशोकेनचेछाचसर्वभूतसमोभवेत् २१ हरिभक्तिर्भवेत्तस्यमन्याज्ञानातिकमपिवं भगवत्तत्वमाहात्म्यंवेत्तिपश्चात्प्रसन्नधीः २२
ततःपरमसंगस्यविस्मोःसायुज्यमश्नुते न्यासविद्यालीनस्यकर्मणांत्यागइष्यते २३ त्यागश्चफलदःप्रोक्तोस्वरूपेणनचकीर्तित
कर्मणेपनियतस्यैवत्यागोमोहस्यमूलकः २४ कर्माणित्यजतःपुंसोनास्तिदेहस्यधारणं यज्ञार्थंसुक्तसंगस्तुकुर्यात्कर्माण्यनेकशः २५
सखायज्ञाश्चजाश्चापिसाहब्रह्माचतुर्मुखः यज्ञरूपपरोधर्मोभगवत्प्रीतिकारकः २६ अभिसकामंसुष्यतःतस्मायज्ञःपरागतिः
हरिनतस्मात्प्रजाःसर्वाःकुर्युःसंगविवर्जिता २७ यदेवःश्रीनासुरिःसर्वमश्निश्चप्रयच्छति लब्धाभिष्टपरंतस्माद्यज्ञंकुर्यात्[illegible] २८
तेनसर्वंतुविज्ञेयःसर्वंकर्मवहीस्थते ततःकर्मैवकर्तव्यंफलसंगविवर्जितं २९ कर्मणैवचपुराकेचित्पारांसिद्धिमितोगताः
भगवत्तत्वनिष्ठस्यतस्याजालंधरमहते ३० लोपस्तुसाज्ञावेतस्यमरतोयोधर्मसंग्रहः आज्ञानुवर्तनंपुंसांमाहोकार्याहिसर्वथा ३१
हरौसर्वाणिकर्माणिसन्यसेद्योगवित्तमः निर्ममोनिस्पृहस्तस्य[illegible]ध्यानमास्थितः ३२ समंकृत्वासुखंदुःखंलाभालाभौजयंतथा
परापरंवसीतोष्णमानंचापवमानकं ३३ सर्वत्रगंपरंब्रह्मध्यायसततमात्मनि प्रातरारभ्यकर्माणिकुर्वन्निजात्रिकंतथा ३४
स्वाध्यायंचकथायोगंततःकालेनहापयेत् नित्यनैमित्यकंकर्मयथाशक्तिनहापयेत् ३५ रहोवनंचकाराग्रेमलाकरणमेवच
विमानंलेपनंचैवयथाज्ञास्त्रप्रीतिकारणं ३६ उत्सवसेवनंचैवयथाशक्तिनिवेदनं नदीयाराधनंचापिकुर्वन्निष्कपमात्रमस्तु ३७
श्रीमच्छंकरनाथस्यनिर्विहितजलेसतथा अर्चैर्वचैस्तथामाल्यैःशरीरंपस्यपोषणं ३८ कुर्वन्नाचारमाहात्म्यात्परांगतिमवाप्नुयात् इतिश्रीमच्छंक
रदगिरिं अष्टाविंशतिमोध्यायः ॥ २८ ॥ ॥ ७ ७ ॥ ७ ॥

द्वेअक्षरणीवेदितव्येपरंचापरमेवच अपरोजीवकोटीःसक्षरशब्देनयःस्मृतः १ कूटस्थोक्षरभावश्चपरमात्मेतिकीर्त्तितः
बिभर्त्तिसर्वलोकांश्चप्रविश्यजगतःपुनः २ ईश्वरोव्ययोनिःसारस्त्वपुरुषोत्तमः अतितंक्षरमत्यथमक्षरंचेपरःपुमान् ३
२८ इतियोवेत्तिपुरुषमसंमूढःपरार्थवित् सर्वदेवस्तुतंनित्यंव्यंकटेशमनामयं ४ यस्तुयोगविदांश्रेष्ठोयोगमभ्यस्तिबुद्धिमान् ।
यमाश्चनियमानैवपीठभेदास्तथैवच ५ प्राणायामाश्चविविधाप्रत्याहारंतथैवच धारणाध्यानभेदाश्चसमाधिंसाधयेत्सुधीः ६ २८
यमादिध्यानपर्यंताःसमाधेःसिद्धिहेतवः समाधेरंगभावोपितस्मादष्टांगउच्यते ७ कर्त्तव्यंप्रसहंतद्यदेनावद्धितिनिश्चयः
सएवनियमःप्रोक्तःस्वस्तिकाद्यासनंविदुः ८ रेचकःपूरकश्चैवकुंभकश्चेतिकीर्त्तितः प्राणायामस्त्रिधाप्रोक्तःप्रत्याहारस्तुकथ्यते ९
चित्तस्याहृत्यानीतिर्यस्तुविषयेभ्यश्चयोगिनः आत्मन्येवात्ममनसःस्थापनंधारणास्मृतं १० तैलधारावदच्छिन्नंतानसंतानलक्षणं
ध्यानंस्यादात्मविज्ञानंज्ञेयाभिदात्मकं ११ ज्ञातुर्लयस्यबुद्धेश्चभेदज्ञानंयदानहि परमानंदजननेपरानंदचिदात्मनि १२
मनोयदाभातियोगीसमाधिःसतुगीयते एवमभ्यस्यमेधावीपंचकालपरायणः १३ तत्तत्कालविधानोक्तमाचारंचसमाचरेत्
सायंकालेप्रतिदिनंयोगंकुर्याद्विचक्षणः १४ विविक्तदेशेकोदिसर्वबाधाविवर्जिते मृद्वासनेसुखासीनःस्वस्तिकाद्यासनेस्थितः १५
ऋजुकायःशिरोग्रीवोनासाग्रेन्यस्तलोचनः इडयावायुमाकृष्यकुंभयेच्चशनैःशनैः १६ उद्बोध्यकुंडलींसुप्तांसुषुम्नायांप्रवेशयेत्
यदातुयोगिनोदेहेजिह्वासावर्त्ततेसदा १७ ॐमित्युच्चारयेद्योगीव्यंकटेशमनुस्मरन् अमरंप्राह्निर्गत्यप्रविशेदधिवादिकं १८
अचिरादिषुमार्गेणप्रविश्यपरमंपदं सायुज्यंव्यंकटेशस्यलब्ध्वानंदीभवेच्चिरं १९ यदाहिव्यंकटेशस्यकिंकरेच्छाबलीयसी
यदायोगंस्थिरंकुर्यादुपदेशात्कृशोस्ययं २० पूर्वोक्तेनैवमार्गेणयोगंकुर्याद्विचक्षणः इडयोवायुमाकृष्यसुषुम्नायांप्रवेशयेत् २१
अर्चिषांसहगोप्याग्रेप्रविशेद्धृत्पांबुजं तत्रस्थंकेशवंबुध्वाशंखचक्रगदाधरं २२ आज्ञास्थानमतीत्यैवंभ्रूमध्येप्रविशेत्सुधीः

निवारकरसूक्ष्मं तत्र पश्येच्छ्रियः पतिं २३ ततः सहस्रकमलमध्यस्थं चेंदुमंडलं तत्र पश्येद्रमाधीशं सुधाधीशं सुधात्मकं २४
तत्संकेत्याः च्चक्रबिंबात्स्रवत्पियूषबिंदुना अंतर्बहिस्तथाप्यामं स्वस्य देहं विचिंतयेत २५ सुषुम्नायास्तथा मार्गादेव स्वशनैः शनैः
प्राणादिस्थापयेद्वायुं तत्स्थानेषु पूर्ववत् २६ एवं प्रत्यहं कुर्यात्संध्यामध्यमरात्रिषु विनाहस्तेन कुर्यात्तु वायोर्धारणमात्मनि २७
शरीरादधिकं वायुं दिग्णगुलमानकं शरीरे तु समं कुर्यान्न्यूनं वायुं न चात्मनि २८ एवमभ्यासयोगेन वज्रकायो भवेन्नरः
कालमृत्युं च निर्जित्य जीवेदाचंद्रतारकं २९ अस्य योगस्य विघ्नानि भवंत्यपि बहून्यपि अविघ्नाविद्योगसिद्ध्यर्थं व्यंकटाद्रयष्टवरे ३०
अस्ति किंचित्सरः पुण्यं नाम्ना सनकनंदनं उत्तरे पापनाशस्य क्रोशार्द्धे सिद्धसेविते ३१ अतिगोप्यं न तत्कोपि जानंति मनुजा भुवि
मार्गशीर्षे सिते पक्षे द्वादश्यां मनुजेंद्रये ३२ स्वामिपुष्करिणीतीर्थे स्नात्वा नियतमानसः अयोदशीं समारभ्य स्नायात्सनकनंदने ३३
स्नात्वा तत्रैव कुर्वीत व्यंकटाद्रिपतेः परं श्रीमदष्टाक्षरं मंत्रं जपेदयुतमन्वहं ३४ पश्चात्समभ्यसेद्योगान्ततः सिद्धो भविष्यति
रहस्यं तत्समीपे तु तीर्थं कायरसायनं ३५ तस्य पानात्क्षणाद्देहो सिद्धो भवति तत्क्षणात् यत्किंचित्पांडुपुत्रं च परिक्षार्थं विनिक्षिपेत् ३६
तस्मिंतीर्थे क्षणादेव श्यामं भवति शोभनं शिलायां निहितं त्वन्तु योगिभिः सनकादिभिः ३७ महात्मनां पुण्यवतां दर्शनं याति तत्सरः
येन केन प्रकारेण कृत्वा देहदृढं बुधः ३८ कैंकर्यमेव कुर्वीत व्यंकटेशस्य सर्वदा स्वरूपमात्मनो यस्मात्कैंकर्यं शेषिणो हरेः ३९
कैंकर्यहीनः पुरुषः स्वामिद्रोही न संशयः तस्मादेव तु कुर्वीत नित्यं नैमित्यकं बुध ४० अन्यच्च प्रातिकर्मापि यत्नेन शास्त्रेण निंदितं ४१।
ईशिश्वरवराहेणाधरण्येव्यंकटाचले ४१ शरीरधारणं भोगो ज्ञानं सामर्थ्यमेव च क्षेत्रं गृहं धनं धान्यं पश्चान्यद्दुपकल्पितं ४२ ।
सर्वं व्यंकटनाथस्य कुर्यात्साधीनमंजसा विनम्भरमिनं सर्वं जगत्पश्यंश्च बुद्धिमान् ४३ निरंत्यापापकारीतु पतत्येव विनिश्चयः ।
पुण्यकृत्सुखमाप्नोति फ्रचमित्येव बुद्धिमान् ४४ चिंतयेत्सततं योगी चिंतयेमव्यंकटेश्वरं धर्मशास्त्रसदापश्यगुरुसुखपरारतः ४५ ।

गृहस्थं स्वेषु दारेषु रमेयोगि जितेंद्रियः साधुनेव सहायो गीयच्छेद्बोधनमात्मनः ४६ विचारयेच्च वेदार्थान्सदा वेदांतमभ्यसेत
२९ बहुनेह किमुक्तेन विहितं नैव संत्यजेत ४७ इति श्रीमद्दत्तपुराणे श्रीव्यंकटकगि० एकोनत्रिंशतिमोध्यायः २९ ॥ मुनयऊचु
सूतसर्वार्थतत्त्वज्ञ सर्ववेदांतपारगः येन चाराधितः सद्यः श्रीमद्व्यंकटनायकः १ भवत्यभीष्टसर्वार्थप्रदस्तद्ब्रूहि नो घने २९
इति पृष्टस्तथा सूतो ध्यात्वा स्वात्मनि तत्क्षणं २ उवाच मुनिशार्दूलाञ्छ्रूयतामिति वै मुनिः अस्ति किंचिन्महत्प्राप्यं भगवत्प्रीतिकारकं ३
पुरा शेषेण कथितं कपिलाय महात्मने नाम्नामष्टशतं पुण्यं पवित्रं पापनाशनं ४ आदाय हेमपद्मानि स्वर्णदी संभवानि च
अस्मात्पूर्वमभ्यर्च्य श्रीमद्व्यंकटनायकं ५ अष्टोत्तरशतैर्दिव्यैर्नामभिर्मुनिसत्तमैः स्वाभिष्टं च ततो लब्धा ब्रह्मा लोकपितामहः ६
न तद्धि परिपप्रच्छ समर्च्य स्तोत्र नामभिः तेषां शेषेण गाथी शमान सोल्लास कारिणं ७ नाम्नामष्टशतं वक्ष्ये व्यंकटाद्रिनिवासिनः
आयुरारोग्यदं पुंसां धनधान्यसुखप्रदं ८ ज्ञानप्रदं विशेषेण महदैश्वर्यकारकं अर्चयेन्नामभिर्दिव्यैर्व्यंकटेश पदांकितैः ९
नाम्नामष्टशतं स्यास्य ऋषीर्ब्रह्मा प्रकीर्तितः छंदोनुष्टुप्तथा देवो व्यंकटेश उदाहृतः १० नीलगोक्षीरसंभूतो बीजपिक च्यते बुधैः
श्रीनिवासस्तथा शक्तिर्हृदयं व्यंकटाधिपः ११ विनियोगस्तथाभिष्टसिध्यर्थे निनिगाधते ॐनमो व्यंकटेशाय शेषाद्रिनिलयाय च १२
वृषदृग्गोचरायाथ विष्णवे सततं नमः सदंजनगिरीशाय वृषाद्रिपतये नमः १३ मेरुपुत्रगिरीशाय सरःस्वामितटेजुषे
कुमारकल्पसेव्याय वज्रिदृग्विषयाय च १४ सुवर्चलासुतन्यस्त सेनापत्यभराय च रामाय पद्मनाभाय सदावायुस्तुताय च १५
त्यक्तवैकुंठलोकाय गिरिकुंजविहारिणे हरिचंदनसंघर्षनगेंद्रस्वामिने नमः १६ शंखराजन्यनेत्राब्जविषयाय नमो नमः
वसूपरिचरित्राय लक्ष्मीशाय सततं नमः १७ अभिषेकं पापरिक्षुन्न वभसेव्यं करायच सनकादिमहायोगी पूजितायनमोनमः १८
देवजित्प्रमुखानंतदैत्यसंघप्रनाशिने स्वेतद्वीपवसन्मुक्तपूजितांघ्रियुगायच १९ शेषपर्वतरूपाय प्रशासनपराय च
सानुस्थापितताक्ष्याय ताक्ष्याचलनिवासिने २० मायागूढविमानाय गरुडस्कंदवासिने अनंतसिरसे नित्य मनताक्षाय ते नमः २१

अनंतचरणाब्जाय श्रीशैलनिलायच दामोदरायतेनित्यंनीलमेघनिभायच २२ ब्रह्मादिदेवदृश्यायविश्वरूपायतेनमः ।
वैकुंठागतसिद्धाग्रविमानानर्गलायच २३ अगस्त्याभ्यर्थिताशेषजनदृग्गोचरायच वासुदेवायहरयेतीर्थपंचकवासिने २४
वामदेवप्रियायाथजनकेष्टप्रदायच मार्कंडेयमहातीर्थजातपुण्यप्रदायच २५ वाक्पतिब्रह्मदात्रेचंद्रलावण्यदायिने
नारायणनगेशायब्रह्मक्लृप्तोत्सवायच २६ शंखचक्रवरानम्रलसत्करतलायच उत्फुल्लमुखमदासक्तविग्रहायनमोनमः २७
केशवायनमस्तुभ्यंनमोयौवनमूर्तये अर्थितार्थप्रदात्रेचविश्वतीर्थाघहारिणे २८ तीर्थस्वामिसरस्स्नानजनाभीष्टप्रदायिने
कुमारधारिकावासस्कंदमहाभक्तिप्रदायच २९ जानुदघ्नसमुत्फुल्लपोत्रिलोकूर्ममूर्तये किन्नरद्वंद्वशापांतप्रदात्रेमाधवायच ३० ॥
वैखानसमुनिश्रेष्ठपूजितायनमोनमः सिंहाचलनिवासायश्रीमन्नारायणायच ३१ सभक्तनीलकंठार्च्यनृसिंहायनमोनमः
कुमुदाख्यगणश्रेष्ठसेनापत्यप्रदायच ३२ दुर्मेधःप्राणहर्त्रेचश्रीधरायनमोनमः उपत्यकाप्रदेशस्थशंकरध्यानमूर्तये ३३
रुक्माब्जाख्यसरःकूललक्ष्मीकृततपस्विने लसल्लक्ष्मीकराम्भोजदत्तकल्हारकस्रजे ३४ शालग्रामनिवासायशुकदृग्गोचरायच
नारायणार्थिताशेषजनदृग्विषयायच ३५ मृगयारसिकायाथवृषभासुरहारिणे प्रियंगुप्रियकोलायश्वेतकोलवरायच ३६
नीलधेनुपयोधारासेकदेहोद्भवायच शंकरप्रियमित्रायचोलपुत्रप्रदायच ३७ सुधर्मिणेसुचैतन्यप्रदात्रेमधुघातिने
कृष्णाख्यविप्रवेदांतदेशिकत्वप्रदायच ३८ वराहाचलवासायबलभद्रायतेनमः त्रिविक्रमायमहतेहृषीकेशायतेनमः ३९
अच्युतायनमोनित्यंनीलाद्रिनिलयायच नमःक्षीराब्धिनाथायवैकुंठाचलवासिने ४० मुकुंदायनमस्तुभ्यंअनंतायनमोनमः
विरिंचाभ्यर्थितानीतसौम्यरूपायतेनमः ४१ सुवर्णमुखरीजातमनुजाभीष्टदायिने हलायुधजगत्तीर्थसमस्तफलदायिने ४२
गोविंदायनमोनित्यंश्रीनिवासायतेनमः अष्टोत्तरशतंनाम्नांचतुर्थ्यान्तसमन्वितं ४३ यःपठेच्छृणुयान्नित्यंश्रद्धाभक्तिसमन्वितः
तस्यश्रीव्यंकटेशस्यप्रसन्नोभवतिध्रुवं ४४ अर्चनायांविशेषेणग्राह्यमष्टोत्तरंशतं व्यंकटेशाभिधेयंवेव्यंकटाद्रिनिवासिनं ४५

अर्चयेन्नामभिस्तस्य फलमुक्तं प्रसिध्यती गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत् २६ श्रद्धाभक्तिपूजामेव दापयेन्नामसंग्रहं
३० इति शेषेण कथितं कपिलाय महात्मने २७ कपिलाख्यमहायोगीसकाशात्तु मया श्रुतं तदुक्तं भवता मघसंघः प्रीतिकरं हरेः २८
इति श्रीमद्वराहपुराणे श्रीव्यंकटगिरिमा० त्रिंशतितमोध्यायः ३० ७ ७ सूत उवाच अतयूयं पुनः श्रोतुं किमिच्छथ तपोधनाः । ३०
वक्ष्यामि तदशेषेण नानाश्चर्यविचारणा १ इत्युक्ता मुनयः सर्वे प्रोचुरेवमिदं वचः मुनय० भगवन् भगवद्भक्त क्षीरसागरसंगमः २ ।
व्यंकटेशस्य माहात्म्यमुक्तं स्तनतयानघ विचित्रं तस्य चारित्रं मोदायैर्नित्सुलं तथा ३ इह स्वामिवनामातिशोभामाहात्म्यं तदाशितु ।
स्वामिपुष्करिणीतीर्थमहत्वं च प्रकाशितं ४ अन्यत्कृतफलं दिव्यमास्तपरमेव च ५ तं च मुनिशार्दूल सम्यगस्माभिरेव च ६ ।।
श्रोतव्यान्यपीतमेतत्तु व्यंकटेशकथामृतं इति च स्कंदहृदयं स्यापिपिपासालुगरीयसे ६ अस्मात्वमनुजानिहि सर्वार्थं व्यंकटेशमुनेः ।
इत्युक्तस्तत्ततः सूतप्रोवाच मुनिपुंगवान् ७ गच्छध्वं मुनयो यूयं स्नाने श्रीव्यंकटाचलं तत्र गत्वा गिरिं पुण्यं कृत्वापि प्रदक्षिणं ८ ।।
स्नात्वा प्रथ्येतत्तीर्थे पुनस्तापर्यं गतासुरान् आरुह्य रत्नसानूत्तं भृङ्गकोकिलमंजिरं ९ स्वामिपुष्करिणीपथ्यनवखंडनवोचितं ।
स्नात्वा तत्र सरस्तीर्थे प्रदक्षिणविधानतः १० प्रविहत्य विमानं च दर्शनात्पापनाशनं हृदयानन्दजननं भूलमकोङ्कारकं ११
प्रविश्य मंडपं रहं च नत्वा श्रीव्यंकटाधिपं श्रीभूम्यां च मुक्तायुक्तं शंखचक्रवराभयं १२ दध्यानं पुंडरीकाक्षं स्मेरमानमुखांबुजं ।
दाधारस्थासमंजं विद्रुमसदृशस्मितमनोहरं १३ सम्यग्दृष्ट्वा च नत्वा च स्तुत्वा नामभिरेव च अर्चयित्वा तु कमलैर्लेभ्यो मिहं च दुर्लभं १४
स्तुतकृत्या निवर्तध्वं मित्युक्ते मुनयस्तदा आमंत्र्य सततेसर्वे प्रहृष्टाश्च प्रतस्थिरे १५ भरद्वाजकौशिककण्व जाबालीरथकाश्यपः
क्रतुर्दक्षपुलस्त्यश्च गौतमश्च पुनर्हस्तथा १६ आंगिरसो देवलश्च देवदर्शन एव च कौत्सः कुंभमकुं उत्थ्यशतानंदो महामुनिः १७
मैत्रेय प्रमुखास्तत्र संगतायत तपोधनः तत्रतत्र माहात्म्य धारस्वा हाम्नास्वा तपोधनाः १८ व्यंकटाद्रे समागम्य तत्पूजां वनदात्मकं ।
सर्वतीर्थमयं पुण्यं सर्वसिद्धिनिसेवितं १९ मदमंजुलमाधुर्यकोकिलस्वनशोभितं दिव्यनिर्झरसंघर्षफलपुष्पद्रुमैर्युतं २० ।।

अनतिक्रम्य सूतोक्तं सेवार्थं क्रमतो बुधः । वक्ष्यामीयं करे श्वास्य सेवां परमपावनीं २१ कुर्वंतः स्नानमंत्रैश्च निर्झरेषु सरःसु च ।
पश्यंतस्तानि रम्याणि शीतानुनिसीस्वरणि च २२ अरण्यं तत्र रम्याणि पक्षीणां वचनान्यपि गायंतः सामगानि त्यथा रयं तत्सु संयतं २३
निस्यंतस्संभ्रमास्सर्वे रवेलयं तिलपोधनाः उत्पातं ततस्तम्य हर्षावेशाय संगताः २४ गिरिश्रृंगे दक्षिणं सम्यकुर्वंतस्ते शनैः शनैः
स्नात्वा कपिलतीर्थे च दृष्ट्वा नत्वा शिवं हरिं २५ आरुह्य मेरुशृंगं गगनं सिद्धगंधर्वसेवितं अत्यद्भुतान्द्रत्नसानुर्हेमाद्रे रद्भुतो गिरिः २६
असरुध्यमूत प्रवेशे हि श्रीमान्व्यकरमूधरः इति ब्रुवन्तस्ते सर्वे ददृशुर्दिव्यमद्भुतं २७ विमानं स्वामितीर्थं च स्नात्वा देवं श्रियः पतिं
कोटिकंदर्पलावण्यं किरीटमुकुटोज्वलं २८ उरस्थितश्रियाकांतमुक्तादामोपशोभितं चतुर्भुजमुदारांगं शंखचक्रगदाधरं २९
नीलमेघनिभं श्यामं पीतवाससमच्युतं श्रीभूमिसहितं विष्णुं पूगार्चितपदांबुजं ३० प्रणेमुः सहसा दृष्ट्वा हर्षोत्फुल्लविलोचनाः
तुष्टुवुर्वेदमंत्रैश्च स्तोत्रैश्च स्मृतिसंमितैः ३१ मुनयः यः पार्थिवानि गणयोऽरजांसि सुबहून्यपि विष्णुर्वीर्याणि गणयेन्निशेषं सं पुमान्हरेः ३२
त्रेधा च निदधे यस्तु क्रमो विष्णुस्त्रिविक्रमः धर्मान्ध धारयन्यस्तु तस्मै विष्णवे नमः ३३ अतिष्ठत्पंचच्छमोच याय श्रमि दिशं गुलं
भूतं भव्यं च मघासं तस्मै ते विष्णवे नमः ३४ पादोस्य विश्वा त्रिपादस्यामृतं यस्य तस्मै नमो नमः ऋचः सामानि यस्माच्च यजूंषि वेदास्तथा ३५
विप्रा मुखाद्भुजाराजन्यवैश्यश्चोरोरणांतरं शूद्रः पद्भ्यां मुखादग्निर्वक्त्रश्च मनसो विधिः ३६ नेत्रात्सूर्यो यथ यस्यैव तस्मै ते ब्रह्मणे नमः
यतया गुणानाते निवर्तंते ते तमानवाः ३७ बुद्धिर्नाकिंतु हो बाल्याखेद्याम्यापि तथैव च एवं तं तेब हुधा स्तुत्वा स्तोत्रैश्चावेर्मनो हरेः ३८

३२ आदायपद्मपत्राणिश्रीपादंव्यंकटेसितुः अर्चयामासुरस्याग्रेनामभिस्तुतमाषितेः ३९ ततप्रीतोजगन्नाथाताबबाषव्यंकटेश्वरः
तत्रैवनैमिषारण्येप्रीतोस्मिभवतानहं ४० व्यंकटाचलमाहात्म्यंभवतानुभूयतांबुधाः चिरकालंतपोलब्ध्वाअपिदत्तंफलंमया ४१ ३२
यद्दिष्टंमुनीनांतुभवतांदत्तमेवतत् व्यंकटाद्रेश्चमाहात्म्यंवहुद्दूरस्थितोपिहः ४२ भक्त्याऽनिवाश्रावयेतेपठेद्वाभक्त्यासहः ।
कन्यामासेविशेषणतस्यावंमूलमोक्षदं ४३ धनधान्यमहीपिष्टंपुत्रपौत्रादिसम्पदं ददामिसर्वकामांश्चदेहान्तेमत्पदंतथा ४४
इतिलब्ध्वावरंतेतुतत्रवत्सरपंचकं स्नात्वासर्वेषुतीर्थेषुव्यंकटाद्रौतपोधनाः ४५ आचार्यान्यपिदत्त्वातेसम्पगाराध्यमापति
पुनश्चनैमिषारण्येययुःसर्वेस्तपोधनाः ४६ गत्वातुनैमिषारण्यंमुनिसंघनिषेवितं उपमर्त्यमुनिःसूतप्रोचुरेवमिदंवचः ४७ ।
अहोतुवत्तुविज्ञानेसहसामध्यमेवतत् यथोक्तंभवताविस्साव्यंकटाद्रिनिवासिनाः ४८ रूपमोदार्यरूपंचगिरिरूपंतथैवच ।
स्थितिंतथैवतत्सर्वंमहोव्यंकटभूधराः ४९ त्वत्प्रसादाद्दृष्टंसर्वेस्तीर्थाश्चमहामुने संस्थानंव्यंकटेशस्यगिरेस्तस्यचसर्वशः ५० ।
दृष्टमेकत्वयाकिंवाभक्तवास्कृतमुक्ततां ततःसूतप्रहाचेदंवचनंमेतपोधनाः ५१ व्यासस्यानुग्रहात्सर्वंविदितंत्वंतपोधनाः
व्यंकटाचलमाहात्म्यंकल्पकोटिशतैरपि ५२ नशक्यंवक्तुंसाहस्रैःशेषाणांचसहस्रकैः अतस्तथापिमाहात्म्यंकीर्तितंकिंचिदेववरि ५३
पुण्यंपवित्रमायुष्यंमाहात्म्यंतमद्भुतं यःपठेच्छ्रातयोभक्त्याश्रृणुयाद्वालिखेतवा ५४ सर्वान्कामानवाप्नोतिसंप्राप्नोतिचमंगलं
एवंभक्त्यातुमाहात्म्यंवाचिकंपूजयेन्नराः ५५ गोभूहिरण्यवस्त्राद्यैतस्यतुष्टोरमापतिः पुत्रार्थिलभतेपुत्रान्धनार्थीलभतेधनं ५६
धर्मार्थीप्राप्नुयाद्धर्मंमोक्षार्थीमोक्षमाप्नुयात् एवंव्यंकटमाहात्म्यंस्वामभक्त्याप्रपूजयेत् पुस्तकंचैववक्तारंतत्सर्वंव्यंकटार्पणं ५७ ॥

इतिश्रीमद्वराहपुराणेश्रीत्र्यंबकगिरिमाहात्म्येचतुर्विंशतिसाहस्रकेक्षेत्रकांडेएकत्रिंशतितमोध्यायः ॥३१॥ ॥
श्रीनृपविक्रमार्कसंवत १८६३ शालिवाहनशके १७२८ क्षयनामसंवत्सरे उदगायने शैशिरतौ शुभमासे माघमासे ॥ ३२
३२ शुक्लपक्षे एकादश्यां तिथौ गुरुवासरे उत्तराषाढानक्षत्रे वर्याणयोगे बालवकौलवकरणे तद्दिने पुस्तकं समाप्तं ॥
पाठकेत्युपनाम्नस्य बाळंभट्टस्य बालकः नाम्ना दिनकरश्चैव तेनेदं लिखितं ध्रुवं १ यादृशं पुस्तकं दृ
ष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न विद्यते २ भग्नपृष्ठकटिग्रीवा स्तब्धदृष्टिरधो
मुखं कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत् ३ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात्
मूर्खहस्ते न दातव्यं यत्नेन प्रतिपालयेत् ४ पुस्तके रामा तुरंगं रामा परहस्ते गता गता कदाचिदागता
ताचैव भ्रष्टा क्लिष्टा च मर्दिता ५ ॥ छ छ छ छ छ छ छ छ छ छ छ छ ॥

[OrderDescription]
,CREATED=17.02.20 13:56
,TRANSFERRED=2020/02/17 at 14:06:11
,PAGES=65
,TYPE=STD
,NAME=S0002836
,Book Name=M-2679-VYANKRAGIRI MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,